ओ३म्

दयानन्दलहरी

महाकविश्रीमेधाव्रताचार्येण
निर्मिता

तस्या इयम्

आभास-व्याख्या-व्युत्पत्ति-भाषार्थ-समन्विता

ज्योतिष्मती टीका

हरयाणाराज्येन पुरस्कृता

टीकाकारः

स्वामी वेदानन्दो वेदवागीशः

● प्रकाशक :-
हरयाणा साहित्य संस्थान
गुरुकुल झज्जर
जि० झज्जर (हरयाणा)
दूरभाष : ५२०४४
५३३३२

● तृतीयं संस्करणम् २०००
विक्रमसंवत् २०५७
ईस्वीयसन् २००१
मूल्यम् १५ रूप्यकाणि

● मुद्रक :-
वेदव्रत शास्त्री
आचार्य प्रिंटिंग प्रेस
गोहानामार्ग, रोहतक
दूरभाष : ०१२६२-४६८७४
५७७७४

साक्षी

सम्मतिः

वेद-व्याकरण-साहित्यादिनानाशास्त्रविचक्षणेन वेदवागीशोपाधिधारिणा महाविदुषा स्वामिना वेदानन्देन विहिताम् आभास-व्याख्या-व्युत्पत्ति-समन्वितां राष्ट्रभाषानुवादेन चालङ्कृतां 'ज्योतिष्मतीं' दयानन्दलहरीटीकां कृत्स्नां समधीत्य लिखामि यट्टीकेयं नूनं 'तमसो मा ज्योतिर्गमय' इति भावनानुसारमध्येतॄणामध्यापकानां च पथ-प्रदर्शिका भविष्यति, सुरभारतेश्च समृद्धिं करिष्यति। टीकेयं स्वामिनोऽगाधं पाण्डित्यं लेखनपाटवं च प्रकटयति।

यथैव रघुवंश-माघ-किरातार्जुनीयादिमहाकाव्येषु मल्लिनाथस्य टीका वर्तन्ते तथैव महाकवेर्मुनिमेधाव्रताचार्यस्य दयानन्ददिग्विजयादिमहाकाव्येष्वपि कोष-व्याकरणादिप्रमाणविभूषिताः सारगर्भिण्यष्टीका भवेयुरिति चिरन्तनोऽस्मन्मनोरथोंऽशतः सफलः समजनि स्वामिनोऽनेन सत्प्रयासेन।

आशासे प्रार्थये चानयैव शैल्या स्वामिवेदानन्दवेदवागीशो दयानन्ददिग्विजयमहाकाव्यमपि ज्योतिष्मत्या सत्वरं सनाथयेदिति।

आचार्य प्रिंटिंग प्रेस,
दयानन्दमठ, रोहतक।

वेदव्रतः शास्त्री
१ अगस्त १९६८

प्रस्तावना

'दयानन्दलहरी' इत्याख्यस्यास्य ज्योतिष्मतीटीकाया इदं प्रथमं संस्करणं विद्यते। सर्वेभ्यः संस्करणेभ्योऽस्मिन्नयं विशेषोऽस्ति यत् उपरिष्टात् आभासः, तदधस्तात् श्लोकाः, तदधस्ताद् व्याख्या, तन्नीचैर्व्युत्पत्तिः, सर्वान्ते च हिन्दीभाषार्थो विहितोऽस्ति ।

आभासे सङ्क्षेपतः श्लोकाशयः, व्याख्यायां प्रतिपदमर्थाः; व्युत्पत्तौ च समासः, विग्रहः, शब्दसाधनं कोषश्चात्मानं मुखरीकरोति । ये पर्यायवाचिनः शब्दा व्याख्यायामुट्टङ्किताः स्ते व्युत्पत्तौ रेखाङ्कितताां बिभ्रति ।

एवं विधानेन दयानन्दलहरी-अध्येतॄणां छात्राणां महांल्लाभो भविष्यतीति मन्ये ।

छात्रहितैषी

स्वामी वेदानन्दो वेदवागीशः

कविपरिचयः

आर्यमहाकविश्रीमन्मेधाव्रतमुनिविरचितेयं "दयानन्दलहरी" "गङ्गालहरी" इव नश्चेतांसि समुल्लासयति। कविरत्नस्य रचनैषानेकगुणमण्डिता, भक्तिरसान्विता, सुललिता पद्यमयी च विद्यते। शिखरिणी, स्रग्धरा, पृथ्वी, शार्दूलविक्रीडितम्, उपजातिरित्याद्यैर्वृत्तैर्गुम्फिता कृतिरियं साधारणानामपि नृणां हृदयानि गानावसरे प्रमोदयति किमुत विपश्चितामपश्चिमानाम्। अस्यां हि खलु शब्दसौष्ठवस्य स्थानं त्वस्त्येव, अर्थगौरवमपि पदमादधाति। किञ्चैषा शब्दालङ्कारैः साकमुपमारूपकस्वभावोक्तिप्रभृतिभिरर्थालङ्कारैरप्यलंङ्कृतात्मानं पुष्णाति।

कविरयं रविरिव दूषणनिषूदने भूषणप्रकाशने चेष्टावानिति ग्रन्थविषयैर्लक्ष्यते। अस्य कविरत्नस्याभिशंसायां पुस्तकस्य प्रत्येकप्रसङ्गविवरणे महाकविमङ्खस्य शब्देष्वेवमभिधातुं शक्यम् "यस्येच्छयैव पुरतः स्वयमुज्जिहीते, द्राग्वाच्यवाचकमयः पृतनानिवेशः।" इति, नैतावदेव, यदवस्थिताविय्ं दयानन्दलहरी निरमायि कविना तस्या उपोद्बलकानि वाक्यान्येवं श्रूयन्ते खलु—"दयानन्दजन्मशताब्दी मथुरायां (१९२५ ख्रीस्ताब्दे) सम्पत्स्यमानासीत्। तस्याः कार्यवाहकप्रधानेन श्रीमता नारायणस्वामिना कविसविधे पत्रमेतत्प्रहितम्— "शताब्दीपरिषदा गुरुवरदयानन्दसम्बन्धि भक्तिमयं काव्यमेकं प्रकाश्य तदवसरे उपायनीकर्त्तव्यमिति निरचायि। तत्काव्यं गङ्गालहरीसदृक्षं स्याद् देववाण्याम्। तन्ममानुरोधेनात्मभक्तिमालिका गुरोः स्मृतावुपहारीकार्यावश्यमायुष्मता।" पत्रमेतन्निभाल्यास्य कवेर्नेत्रे निमीलिते। नयनाभ्यां मुक्ते इव बिन्दुद्वयं पपात। नातिचिराच्चक्षुषी अपावृते। दीर्घश्वासेन सार्द्धं तदवदनादेते शब्दाः निस्सृताः—

"प्रभो ! किं विदधे विषमातिशायनीमवस्थामापन्नोऽस्मि । अस्य दीनस्य त्वमेवासहायः सहायोऽसि । एकतः कर्त्तव्यपरायणा पत्नी रुक्पीडिता शय्यां श्लिष्यति, द्वितीयतो नवजातः शिशुः क्रन्दनेन करुणायते, अन्यदीये पक्षे भारतमुद्दिधीर्षोर्दयानन्दस्य जन्मशताब्द्यां कविताः प्रणेतुं गुरोर्निदेशः प्रतीक्ष्योऽस्ति ।"

धीरतामवलम्ब्य कविरसौ कृतसङ्कल्पः सन् भार्यार्भकौ सेवमानोऽपि दयानन्दस्मरणे कवितापुष्पाणि समर्पयितुमुद्येमे । यदा हि डिम्भरोगिण्यावेकदैव निद्रावशवर्तिन्यौ स्म भवतः, तदैवास्य लेखनी सुरभारतीमुपास्ते स्म । एतादृश्यां दशायां कविः दयानन्दलहरीं निर्माय कोविदानां परिषद्गोष्ठ्यां प्रतुस्तुवे । यां दर्शं दर्शं समीक्षकाणां मनांसि प्रमोदभरितानि सञ्जज्ञिरे । ते पुत्रकलत्रे त्विदानीं संसृतौ नाक्षिलक्ष्यौ भवतः, कृतिस्त्वस्य रञ्जयति चेतांसि पाठकानाम् । अतः—

हृद्यैस्सुगद्यैरनवद्यपद्यैस्सद्यस्समाह्लादितपारिषद्यः,
विद्यावतां द्योतितचित्तसद्मा विद्योतते योऽद्य कविप्रकाण्डः ।
तस्यैव मेधाव्रतपण्डितस्य प्रशस्यवाग्गुम्फितपद्यकान्ते,
विहृत्य शान्ते कवितावनान्ते प्रीणातु चेतस्सुमनस्समूहः ॥

इत्याशास्महे वयम् ।

कविनामुना विद्यापठनकालतः समारभ्याजीवनं क्रमशोऽधोविन्यस्ता ग्रन्थाः प्रणिन्यिरे—

देशाभ्युदयकाव्यम्, ब्रह्मचर्यशतकम्, प्रकृतिसौन्दर्यम्, पद्यतरङ्गिणी, कुमुदिनीचन्द्रः, रुक्मिणीहरणम्, दयानन्दलहरी, सत्यार्थप्रकाशस्य ५.१०.११ समुल्लासानां संस्कृतेऽनुवादः, दिव्यसङ्गीतामृतम्,

गिरिराजगौरवम्, दयानन्ददिग्विजयं भागद्वयम्, ईशोपनिषत्काव्यम्, ब्रह्मचर्यमहत्त्वम्, नारायणस्वामिचरितम्, विरजानन्दचरितम्, गुरुकुलशतकम्, दिव्यानन्दलहरी, ज्ञानेन्द्रचरितम्, व्रतीन्द्रनित्यानन्दशतकम्, शुद्धिगङ्गावतारः, छन्दःसूत्रवृत्तिः, काव्यालङ्कारसूत्रवृत्तिः, चारुचरितामृतम्, वैदिकराष्ट्रकाव्यम्, साहित्यसुधा भागद्वयम्, विश्वकर्माद्भुतचरितम्, आभिः सर्वाभी रचनाभिः कविरेष विनम्रः, आर्यकुलावतंसः, स्वाध्यायशीलः, वेदधर्मविभूषितः, प्रतिभावान् श्रद्धासिक्तश्च प्रतीयते ।

अपरमिदं विवक्षामि—सर्वः खलु प्रत्नः कविगणः प्रायशः कामुकायते । तत्कृतीनामन्योऽप्यध्येतृवर्गः काव्यशृङ्गाररसमास्वदमानः पापपङ्के निमज्जयति निजात्मानम् । पतयालूस्तु नैसर्गिकी प्रवृत्तिरस्त्येव जनानाम् । तस्या अप्युद्दीपने यो ग्रन्थकृत् कृष्णवर्त्मनि सर्पिरिव ख्यापयत्यात्मानं, कथमसौ कवितारसिकैः सत्क्रियत इत्याश्चर्यं महत् । यजुषश्चत्वारिंशस्याध्यायस्याष्टमेन मन्त्रेण प्रत्यवैमि यदखिलविश्वस्रष्टृ ब्रह्मास्ति कविरत्नम् । तद्यथा निगदितम्—

स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम् ।
कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥

न जातुचित्तदवतारयति नूनं नरके । तस्मात्सर्वहितं चिकीर्षुणा लोककविनापि तथैवोनेत्रा भवितव्यम्, न जीवनह्रासविधानमेव रचयितुः प्रयोजनम् ।

श्रीमेधाव्रताचार्य आर्यकविकुलमणिः स्वामिन आत्मानन्दस्य योगिनः शिष्यत्वमूरीकृत्याध्यात्मरतिर्योगाभ्यासदत्तचेताः परमुद्भावयाञ्चकारात्मशीलेन । किं च लोककल्याणायैव स ब्राह्मे मुहूर्ते प्रबुध्य ब्रह्मचर्यमहत्त्वप्रभृतीनां पुस्तकानां श्लोकरचनां विदधाति

स्म । तस्मादसौ सर्वकविषु पूज्यतमोऽस्तीति निश्चयः ।

नासिकामण्डलान्तर्गतयेवला नाम नगरं स्वजनुषालङ्करिष्णु-र्वृन्दावनगुरुकुलाधीतविद्योऽयं दयानन्दलहरीकारो मेधाव्रताचार्यः सूरतनगरस्थे विद्यालये हिन्दीभाषाया देववाण्याश्च प्राध्यापकत्वमङ्गीचकार । तस्मात्पश्चादाषोडशवर्षं बड़ौदा-आर्य-कन्यामहाविद्यालये आचार्यपदभारं बभार । तत्र ह्यनेन स्वप्रतिभया शिक्षणदाक्ष्येण सहस्रशः कन्यका विद्यां लम्भयित्वा विदुष्यः सम्पादिताः । गृहस्थाश्रमतो वानप्रस्थाश्रमे दीक्षां समादाय कविरेष सरस्वतीसेवापरायणः सन् झज्जर-चित्तौड़गढ़-नरेलास्थितं गुरुकुल-त्रयमुन्निनीषुर्वर्षे कश्चित् कश्चित्कालं गमयामास ।

अवसाने चतुष्षष्ट्यधिकैकोनविंशतितमे (१९६४) ख्रीस्ताब्दे कविवरेण्योऽयं चित्तौड़गढ़संयानस्थात्राभ्यर्णस्थितमार्षगुरुकुलमाचार्य-त्वेनावतंसयामास । तत्र हि कतिपयमासानन्तरं चतुष्षष्ट्युत्तरैकोन-विंशे (१९६४) ख्रीस्ताब्दे नवम्बरमास एकविंश्यां तारिकायां तथै-कविंशत्यधिकविंशे वैक्रमाब्दे (२०२१) मार्गशीर्षे कृष्णपक्षे तृतीयायां तिथौ शनिवासर एकसप्ततिः वर्षाणि दशमासान् चतुर्दशदिनानि (७१-१०-१४) आयुषः समाप्योपरतः । जन्म चास्यार्यकवीन्द्रस्य जनवरीमासस्य सप्तम्यां तिथौ त्रिनवत्युत्तराष्टादशे (१८९३) ख्रीस्तवत्सरे बभूव ।

श्रीसरस्वतीजननीनन्दनः श्रीमदार्यजगज्जीवनजनकानन्दवर्धन-श्चासौ निजमर्जितं कृत्स्नं द्रव्यं स्वरचनामुद्रापणे व्ययाञ्चक्रे । तदित्थं वपुषा मनसा वाचा धनेन चैष आजीवनं सरस्वतीमेवारा-धयामासेति समासः ।

विदुषां कृपापात्रम्

स्वामी वेदानन्दो वेदवागीशः

॥ ओ३म् ॥

॥ ब्रह्मणे नमः ॥

दयानन्द-लहरी

आभासः—अ, उ, म् इति 'ओम्' पदाभिधेयस्य तस्यैव च वेदवाण्यां प्रयुक्ताया वर्णमालायाः प्रथममक्षरमकारम् 'अग्निमीडे पुरोहितम्' इतिवत् "दयानन्दलहरी" इत्याख्यस्यास्य काव्यस्यादौ प्रयुञ्जानः कविश्चराचरस्य विश्वस्य निमित्तकारणं ब्रह्म ध्यायति; ततश्चासौ वेदवेदाङ्गपारगेणानूचानेनाचार्यचरणेन दयानन्देन महर्षिणा स्वीकृतायाः सरस्वत्या गौरवमाचष्टे—

अखण्डादानन्दान्निगमहिमशैलेन्द्रशिखरात्,
प्रभूता भूतानां जनिलयकृतः शङ्करगुरोः ।
दयानन्दस्येयं सकलभुवनायामृतपदम्,
दिशन्ती गीर्गङ्गा जनितशिवसङ्गा विजयते ॥१॥

व्याख्या—भूतानाम्=चेतनाचेतनानाम्, जनिलयकृतः= जन्मास्तित्वभङ्गकर्त्तुः, शङ्करगुरोः=मङ्गलकृत्पुरोहितस्य ब्रह्मणः, अखण्डात्=नित्यात्, आनन्दात्=अन्तःसुखात्, निगमहिमशैलेन्द्रशिखरात्=वेदतुहिनपर्वतराजकूटात्, प्रभूता=प्रथमतः निस्सृता, सकलभुवनाय=अखिलजगते, अमृतपदम्=अपवर्गम्, दिशन्ती= शिक्षन्ती, दयानन्दस्य=एतन्नामधेयस्य महर्षेः, इयम्=एषा.

गीर्गङ्गा=वाणीजाह्नवी, जनितशिवसङ्गा=प्रकटितशम्भुसम्पर्का, विजयते=विराजते ॥१॥

शिखरिणीछन्दोद आपञ्चचत्वारिंशत्तमात्–"यमौ न्सौ भ्लौ गृतुरुद्राः" इति छन्दोलक्षणात्।

व्युत्पत्तिः—भूतानाम्=भवन्ति सत्तायामागच्छन्तीति भूतानि, तेषां भूतानाम्। जनिलयकृतः=जनिमारभ्य लयं करोतीति जनिलयकृत्, करोतेः कर्त्तरि क्विप् (३.२.७६) तस्य जनिलयकृतः। शङ्करगुरोः=शम् करोतीति शङ्करः "शमि धातोः संज्ञायाम्" (३.२.१४) इत्यच् प्रत्ययः, शङ्कर एव गुरुः शङ्करगुरुः "गुरुः पुरोहितो ब्रह्म" 'अग्निमीडे पुरोहितम्' इतीव, तस्य शङ्करगुरोः। अखण्डात्=न विद्यते खण्डं खण्डो वा यस्य सोऽखण्डः, तस्मात्। निगमहिमशैलेन्द्र-शिखरात्=शैलानामिन्द्रः शैलेन्द्रः, "शैलोऽगः पर्वतः क्ष्माभृत्" हिमप्रधानः शैलेन्द्रः हिमशैलेन्द्रः, निगम एव हिमशैलेन्द्रः निगम-हिमशैलेन्द्रः, "आम्नायो निगमो वेदः" तस्य शिखरं निगमहिमशैलेन्द्र-शिखरम्, "कूटोऽस्त्री शिखरं शृङ्गम्" तस्मात् निगमहिमशैलेन्द्र-शिखरात्, सर्वत्रात्र "भुवः प्रभवः" (१.४.३१) इति अपादानसञ्ज्ञा "प्रभूता" इति शब्दयोगात्, "अपादाने पञ्चमी" (२.३.२८) इति पञ्चमी। सकलभुवनाय=सकलं च तद् भुवनम् सकलभुवनम्, तस्मै सकलभुवनाय। गीर्गङ्गा = गीरेव गङ्गा गीर्गङ्गा "गीर्वाग्वाणी सरस्वती" जनितशिवसङ्गा=जनितः शिवस्य सङ्गो यया सा जनितशिवसङ्गा, "शङ्करः शिवो महादेव ईशानो रुद्र इत्यपि"। विजयते="विपराभ्यां जेः" (१.३.१९) इत्यात्मनेपदम् ॥१॥

भाषा—जड़ तथा चेतन जगत् के जन्म, स्थिति और विनाश करने वाले, मङ्गलकारी, ब्रह्म के नित्य अन्तः सुख स्वरूप एवं वेद रूपी हिमपर्वत की चोटी से निकली हुई, सब मनुष्यों को मोक्ष की शिक्षा करती हुई

ब्रह्म से सम्बन्ध प्रकट कराने वाली महर्षि दयानन्द की यह वाणी रूपी भागीरथी विजय पारही है ॥१॥

आभासः—इत्थमुपवर्णितस्य दयानन्दस्यर्षेः समाधिं निरूपयितुमुपक्रमते—

निरुध्यात्मन्यन्तःकरणममलं शान्तविषयम्,
परब्रह्मानन्दे निरतमनसो ब्राह्मसमये ।
दयानन्दस्यादो मुखकमलसौन्दर्य्यमतुलम्,
भवारण्यक्लेशं हरतु तमलेशं जनिजुषाम् ॥२॥

व्याख्या—ब्राह्मसमये=ब्राह्ममुहूर्त्ते, शान्तविषयम्=निवृत्तरागादिविषयम्, अत एव अमलम्=मलरहितं स्वच्छमित्यर्थः, अन्तःकरणम्=मनोबुद्धिचित्ताहङ्कारचतुष्टयम्, आत्मनि=निजरूपे, निरुध्य=समाधाय, परब्रह्मानन्दे=अनुत्तमोम्सुखे, निरतमनसः=दत्तमानसस्य, दयानन्दस्य महर्षिदयानन्दस्वामिनः, अदः=तत्, अतुलम्=तुलाहीनमसदृशम्, मुखकमलसौन्दर्यम् =आननीरमललावण्यम्, जनिजुषाम्=जन्मग्राहिणां जनानाम्, तम्=प्रख्यातम्, अलेशम्=कृत्स्नम्, भवारण्यक्लेशम्=संसृतिविपिनकष्टम्, हरतु=अपनुदतु ॥२॥

व्युत्पत्तिः—ब्राह्मसमये=ब्रह्मणोऽयं ब्राह्मः "तस्येदम्" (४.३.१२०) इत्यण्, ब्रह्मन्+अण् "नस्तद्धिते" (६.४.१४४) इति टिलोपः "रात्रेश्च पश्चिमे यामे मुहूर्त्तो ब्राह्म उच्यते" तस्योपयोगकरणे मनुराह-"ब्राह्मे मुहूर्त्ते बुध्येत धर्मार्थौ चानुचिन्तयेत् ।" ब्राह्मश्चासौ समयः ब्राह्मसमयः, तस्मिन् ब्राह्मसमये । शान्तविषयम्=शान्ता विषया यस्य तत् शान्तविषयम्—अन्तःकरणविशेषणम्, बहुव्रीहि-

समासः। अन्तःकरणम्=अन्तः क्रियते अनेन तद् अन्तःकरणम्। परब्रह्मानन्दः=ब्रह्मण आनन्दः ब्रह्मानन्दः, परश्चासौ ब्रह्मानन्दः परब्रह्मानन्दः, अथवा परञ्च तद् ब्रह्म परब्रह्म, परब्रह्मण आनन्दः, परब्रह्मानन्दः, तस्मिन् परब्रह्मानन्दे। निरतमनसः=निरतं मनो यस्य स निरतमनाः, तस्य निरतमनसः, "चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः" इति पर्यायाः। मुखकमलसौन्दर्यम्= "वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम्" मुखं कमलमिव इति मुखकमलम्, "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" (२.१.५६) इत्युपमितसमासः, सुन्दरस्य भावः सौन्दर्यम्, भावे ष्यञ्, 'सुन्दरं रुचिरं चारु' मुखकमलस्य सौन्दर्यं मुखकमलसौन्दर्यम्, तत्। जनिजुषाम्=जनिं जुषन्ते इति जनिजुषः, जुष् "प्रीतिसेवनयोः" इति धातोः क्विप्, तेषां जनिजुषाम्। भवारण्यक्लेशम्=भव एव अरण्यम् भवारण्यम्, तस्य क्लेशः भवारण्यक्लेशः, तं भवारण्य-क्लेशम् ॥२॥

भाषा—प्रातःकाल राग-द्वेष आदि विषयों से शान्त पवित्र अन्तः-करण को चेतन रूप अपने आत्मा में लगाकर पर ब्रह्म परमात्मा के आनन्दरस में निरतमन वाले महर्षि दयानन्द सरस्वती के मुख कमल की वह अतुल सुन्दरता मनुष्यों के जगत् रूप जङ्गल के दुःखों को दूर करे ॥२॥

आभासः—मेघरूपेण यतिं दयानन्दं साम्प्रतं चित्रयति—

अविद्यावातालीजनितमतदावानलकुलैः,
अशेषं संसारं कवलितमसारं वनमिव।
गृहीतैर्गम्भीरान्निगमजलधेर्बोधसलिलैः,
दयानन्दाम्भोदो जयति शमयन्नेष रुचिरः ॥३॥

व्याख्या—अविद्यावातालीजनितमतदावानलकुलैः= अबोधप्रभञ्जनपङ्क्तिनिस्सृतसम्प्रदायारण्याग्निनिकरैः, कवलितम्=भुक्तम्, असारम्=फल्गु, वनमिव=विपिनवत्, अशेषम्=सकलम्, संसारम्=जगत्, गम्भीरात्=गभीरात्, निगमजलधेः=वेदोदधेः, गृहीतैः=उपात्तैः, बोधसलिलैः=तत्त्वज्ञानपानीयैः, शमयन्=सान्त्वयन्, एषः=असौ, रुचिरः=मनोज्ञः, दयानन्दाम्भोदः=दयानन्दमेघः, जयति=विजयमेति ॥३॥

व्युत्पत्तिः—अविद्यावातालीजनितमतदावानलकुलैः = वाताः "नभस्वद्वातपवनपवमानप्रभञ्जनाः" तेषाम् आली वाताली, "कृदिकारादक्तिनः" (४.१.४५) इत्यत्र वार्तिकेन ङीष्, "वीथ्यालिरावलिपङ्क्तिः" अविद्यैव वाताली अविद्यावाताली, तया जनितानि मतानि अविद्यावातालीजनितमतानि, दावानलः=दुनोति उपतापयतीति दावः "दुन्योरनुपसर्गे" (३.१.१४२) इति णः "दवदावौ वनारण्यवह्नी "दाव एवानलो दावानलः, "अग्निर्वैश्वानरो वह्निः कृशानुः पावकोऽनलः" अविद्यावातालीजनितमतानां दावानलः अविद्यावातालीजनितमतदावानलः, तस्य कुलानि तैः अविद्यावातालीजनितमतदावानलकुलैः। कवलितम्=केन जलेन वलते चलतीति कवलो ग्रासः, तं करोतीति कवलयति, ततः कर्मणि क्तः कवलितः, तं कवलितम्। निगमजलधेः=निगमा एव जलधिः निगमजलधिः, तस्मात् निगमजलधेः। गृहीतैः=क्तान्तं रूपम्, "ग्रहोऽलिटि दीर्घः" (७.२.३६) इति दीर्घत्वम्। बोधसलिलैः=बोधा एव सलिलानि बोधसलिलानि, तैः बोधसलिलैः। शमयन्=शमयतीति शमयन् शत्रन्तं रूपम्। दयानन्दाम्भोदः=अम्भो ददाति अम्भोदः "आतोऽनुपसर्गे कः" (३.२.३) इति कः, कित्त्वात् "आतो लोप इटि च" (६.४.६४) इत्याल्लोपः, दयानन्द एव अम्भोदः दयानन्दाम्भोदः ॥३॥

भाषा—अबोधरूपभयङ्कर आंधी से उत्पन्न मतमतान्तर रूप जङ्गल के अग्नियों द्वारा सम्पूर्ण जगत् वन के समान जलाया जा रहा है। जैसे समुद्र-जल से अग्नि शान्त किया जाता है, वैसे श्रुति वचनों द्वारा सम्प्रदायों को मिटाता हुआ यह देव दयानन्द उत्तरोत्तर बढता जा रहा है ।।३।।

आभासः—एवं श्रीदयानन्दं मेघरूपं प्रस्तुत्य सम्प्रति विधुमिव प्रस्तौति—

अविद्यातिध्वान्तं दिशि दिशि ततं चेतसि नृणाम्,
तमोभिस्तान्तानां श्रुतिरविकराक्रान्तहृदयः ।
द्विजालीशाली यो ह्यमृतमयगोभिर्दलितवान्,
दयानन्दं वन्दे सकलजगदानन्दनविधुम् ।।४।।

व्याख्या—यः=जगत्प्रसिद्धो दयानन्दः, हि=खलु, श्रुतिरविकराक्रान्तहृदयः = निगमादित्यरश्मिभासितस्वान्तः, द्विजालीशाली=ब्राह्मणक्षत्रियवैश्यगणशोभी, अमृतमयगोभिः=अपवर्गप्रदवाग्भिरमृतभरितरश्मिभिश्च, दिशि दिशि=सर्वत्र, तमोभिः=अज्ञतातिमिरैः, तान्तानाम्=आच्छन्नानाम्, नृणाम्=नरनारीणाम्, चेतसि=मनसि, ततम्=विस्तृतम्, अविद्यात्तिध्वान्तम्=मूढतान्धकारम्, दलितवान्=अपसारितवान्, सकलजगदानन्दनविधुम्=सम्पूर्णसंसारसुखयितृसुधाकरम्, दयानन्दम् = दयानन्दस्वामिनम्, वन्दे=शंसामि नमस्यामि वा ।।४।।

व्युत्पत्तिः—श्रुतिरविकराक्रान्तहृदयः=श्रुतिरेव रविः श्रुतिरविः, "श्रुतिः श्रोत्रे तथाम्नाये वार्तायां श्रोत्रकर्मणि" तस्य कराः श्रुतिरविकराः, "बलिहस्तांशवः कराः" तैराक्रान्तं हृदयं यस्य

स श्रुतिरविकराक्रान्तहृदयः । द्विजालीशाली=द्विजानामाली द्विजाली, "आली, संख्यावली अपि" तां शालते इति द्विजालीशाली, ताच्छील्ये णिनिः । अमृतमयगोभिः=गम्यते ज्ञायते चित्ताभिप्रायो यया सा गौः, प्राचुर्येण प्रस्तुतम् अमृतम् अमृतमयम् 'तत्प्रकृतवचने मयट् (५-४-२१) इति प्राचुर्ये मयट् । अमृतमयमासु गोषु ताः अमृतमयगावः. ताभिरमृतमयगोभिः, "स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणिभू जले लक्ष्यदृष्ट्या स्त्रियां पुंसि गौः"। दिशि दिशि=सर्वत्र, नित्यवीप्सयोः (८-१-४) इति वीप्सायां द्विर्वचनम् , तान्तानाम्=तनोतेर्निष्ठा, अनुनासिकस्य क्विझलोः क्ङिति (६-४-१५) दीर्घः तान्ताः, तेषां तान्तानाम् । नृणाम्=नार्यश्च नरश्च नरः, तेषां नृणां पुमान् स्त्रिया [१-२-६७] इत्येकशेषः, "नृनरयोर्वृद्धिश्चे"ति ङीन् नारी, अविद्यातिध्वान्तम्=अत्यन्तम् ध्वान्तं अतिध्वान्तं सुप्सुपेति समासः, अविद्यैव अतिध्वान्तं अविद्यातिध्वान्तं, "अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः"। सकलजगदानन्दनविधुम्=सकलं च तज्जगत् सकलजगत्, तस्यानन्दनः सकलजगदानन्दनः," स चासौ विधुरिव सकलजगदानन्दनविधुः, "विधुः सुधांशुः शुभ्रांशुः" तं सकलजगदानन्दनविधुम् ।।४।।

भाषा— निश्चय हि जिस दयानन्द ने वेद रूप सूर्य के किरणों से अपने हृदय को व्याप्त किया और ब्राह्मण, क्षत्रिय, वैश्य द्विजों में शोभा पाकर अमृत भरे किरणों रूप मुक्ति प्रद वचनों से सर्वत्र अन्धकार से ढके हुए नर नारियों के चित्त में फैले हुए अविद्यान्धकार को विनष्ट किया उस सम्पूर्ण जगत् को आनन्दित करनेवाले चन्द्ररूप दयानन्द की मैं (कवि) प्रशंसा वा नमन करता हूँ ।।४।।

आभासः—चन्द्ररूपेण दयानन्दं निरूप्येदानीं सिंहत्वेन निरूपयति—

असन्मार्गालम्बैर्जनमृगकदम्बैरपसृतम्,
विदूराद्यं श्रुत्वा विकलहृदयैः सत्वरमहो ।
सभाजौ वादीन्द्रद्विरदवरवाक्सङ्गरभवः,
मुनीन्द्रस्योङ्कारो रव इव मृगेन्द्रस्य जयतात् ॥५॥

व्याख्या- अहो=विस्मयम्, यम्=दयानन्दं, विदूरात्=दविष्ठात्, श्रुत्वा=निशम्य, विकलहृदयैः=विह्वलान्तःकरणैः, असन्मार्गालम्बैः=विपरीतसरणिशरणैः, जनमृगकदम्बैः=नरकुरङ्गवृन्दैः, सत्वरम्=झटिति, अपसृतम्=विद्रुतं, सभाजौ=गोष्ठीसमरे, वादीन्द्रद्विरदवरवाक्सङ्गरभवः=वाचोयुक्तिपटुयूथनाथवाणीसंग्रामवर्तमानः, मृगेन्द्रस्य=केसरिणः, रव इव=क्ष्वेडेव, मुनीन्द्रस्य=महामुनेः, ओङ्कारः= प्रणवघोषः, जयतात्=विजयं कुरुतात् ॥५॥

व्युत्पत्तिः- अहो="अहो हो चेति विस्मये" विदूरात्=दवीयश्च दविष्ठं च सुदूरेऽर्थे प्रयुज्यते । विकलहृदयैः=विकलानि हृदयानि येषां ते विकलहृदयाः तैः विकलहृदयैः असन्मार्गालम्बैः=न सन् असन्, असंश्चासौ मार्गः, असन्मार्गः, असन्मार्गस्यालम्बो येषां ते असन्मार्गालम्बाः तैः असन्मार्गालम्बैः । जनमृगकदम्बैः=जना मृगा इव जनमृगाः "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" (२-१-५६) इत्युपमितसमासः, जनमृगानां कदम्बानि जनमृगकदम्बानि, तैः जनमृगकदम्बैः । कदम्बं निकुरम्बे स्यान्नीपसर्षपयोः पुमान्" इति युगलकोषः । "स्त्रियां तु संहतिर्वृन्दं निकुरम्बं कदम्बकमि"ति कविस्मरणात् । सत्वरम्="झटिति

शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतम्, सत्वरं चपलं तूर्णमविलम्बितमाशु च।" सभाजौ=सभा एव आजि: सभाजि:, तस्यां सभाजौ। "समज्या परिषद्गोष्ठीसभासमितिसंसद:। आस्थानी क्लीबम् आस्थानम्, स्त्रीनपुंसकयो: सद:।" आजि:="युद्धमायोधनं जन्यं प्रधनं प्रविदारणम्, मृधमास्कन्दनं संख्यं समीकं साम्परायिकम्. अस्त्रियां समरानीकरणा. कलहविग्रहौ। सम्प्रहाराभिसम्पातकलिसंस्फोटसंयुगा:। अभ्यामर्दसमाघातसंग्रामाभ्यागमाहवा:। समुदाय: स्त्रिय: संयत् समित्याजिसमिद्युध:।" वादीन्द्रद्विरदवरवाक्सङ्गरभव:=वादीन्द्रा द्विरदवरा इव वादीन्द्रद्विरदवरा:, वाचां सङ्गर: वाक्सङ्गर:, वादीन्द्रद्विरदवरै: सह वाक्सङ्गर: वादीन्द्रद्विरदवरवाक्सङ्गर:, तत्र भव: वादीन्द्रद्विरदवरवाक्सङ्गरभव:, रव-पदस्य विशेषणम्। द्वौ रदौ=दन्तौ यस्य स द्विरद:, स च वर:, द्विरदवर:, "दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विप:। मतङ्गजो गजो नाग: कुञ्जरो वारण: करी। इभ: स्तम्बेरम: पद्मी यूथनाथस्तु यूथप:।" मृगेन्द्रस्य="सिंहो मृगेन्द्र: पञ्चास्यो हर्यक्ष: केसरी हरि:।" तस्य मृगेन्द्रस्य। रव:="क्ष्वेडा तु सिंहनाद: स्यात्"। मुनीन्द्रस्य="स्थितधीर्मुनिरुच्यते", तस्य मुनीन्द्रस्य। ओङ्कार:=ओ३मृध्वनि:, जयतात्=जयतेर्लोटि प्रथमपुरुषैकवचने तातङादेश:॥ ५॥

भाषा—आश्चर्य है, जिसका आगमन बहुत दूर से सुनकर कम्पित मनवाले और उलटे मार्ग का सहारा लिए हुए जन, हिरणों के समान सिर पर पैर रखकर भाग गये; इसलिये कामना है कि सभा रूपी रण में दिग्गज विद्वानों के साथ वाग्-युद्ध करने हेतु उपस्थित उस महामुनि दयानन्द का ओंकार घोष सिंहनाद के समान उत्कर्ष को प्राप्त हो ॥५॥

आभास:—अथेदानीं महर्षिं भिषजोपमिमीते—

भवाम्भोधौ भीमे विपुलविपदुत्तुङ्गतरल-
प्रचण्डोर्मिव्रातैर्विहतवपुषां व्याधिमकरैः ।
नृणामुद्धर्तारं निजसदुपदेशौषधवरैः,
समर्थस्तं स्तोतुं प्रवरमगदङ्कारमिह कः ॥६॥

व्याख्या– विपुलविपदुत्तुङ्गतरलप्रचण्डोर्मिव्रातैः=महदापदुच्च-चञ्चलात्यन्तकोपनवीचिनिकरैः, भीष्मे=भयानके, भवाम्भोधौ= लोकाम्बुधौ, व्याधिमकरैः=गदोद्रैः, विहतवपुषाम्=आहततनूनाम्, नृणाम्=पुरुषाणाम्, निजसदुपदेशौषधवरैः=स्वसूवचोभैषज्यसत्तमैः, उद्धर्त्तारम्=पारं गमयितारम्, तम्=लोके विदितम्, प्रवरम्= अनुत्तमम्, अगदङ्कारम्=चिकित्सकम्, स्तोतुम्,=वन्दितुम्, इह= अत्र, कः=अज्ञातः, समर्थः=प्रभवः ॥ ६ ॥

व्युत्पत्तिः– विपुलविपदुत्तुङ्गतरलप्रचण्डोर्मिव्रातैः= विपुलाः विपदः विपुलविपदः, उत्तुङ्गास्तरलाः उत्तुङ्गतरलाः, प्रचण्डाः ऊर्मयः प्रचण्डोर्मयः, उत्तुङ्गतरलाः प्रचण्डोर्मयः उत्तुङ्ग-तरलप्रचण्डोर्मयः । सर्वत्र विशेषणविशेष्यसमासः, विपुलविपद एवोतुङ्गतरलप्रचण्डोर्मयः विपुलविपदुतुङ्गतरलप्रचण्डोर्मयः, तासां व्राताः विपुलविपदुतुङ्गतरलप्रचण्डोर्मिव्राताः, तैः विपुलविपदुतुङ्ग-तरलप्रचण्डोर्मिव्रातैः । भीष्मे="दारुणं भीषणं भीष्मं घोरं भीमं भयानकम्" । भवाम्भोधौ=भव एव अम्भोधिः भवाम्भोधिः, तस्मिन् भवाम्भोधौ, "जन्महरौ भवौ", जन्मशब्देन लोको लक्ष्यते उत्पत्ति-मत्त्वात् । व्याधिमकरैः=व्याधय एव मकराः व्याधिमकरास्तैः व्याधिमकरैः, "रोगव्याधिगदामयाः", "शिशुमारोद्रशङ्कवो मकरादयः" । विहतवपुषाम=विहतानि वपूंषि येषां ते विहतवपुषः "शेषाद् विभाषा (५ ४-१५४) इति कबभावः तेषां विहतवपुषाम् । नृणाम्=

"पुरुषाः पूरुषा नरः"। तेषां नृणाम्। निजसदुपदेशौषधवरैः=सन्तश्च ते उपदेशा सदुपदेशाः, सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः (२-१-६१) इति कर्मधारयः, निजाः सदुपदेशाः निजसदुपदेशाः सुप्सुपेति समासः, औषधानि च तद् वराणि औषधवराणि, निजसदुपदेशा एवौषधवराणि निजसदुपदेशौषधवराणि, तैः निजसदुपदेशौषधवरैः। उद्धर्तारम्= उद्-हर्तारम् "झयो होऽन्यतरस्याम्" ८-४-६२) इति हकारस्य पूर्वसवर्णादेशः, अथवा उद्धर्तारम् धरतेरेव तृच्प्रत्ययः, तम्=तच्छब्देन पूर्व-प्रतिपादितविश्रुतपुरुषो दयानन्दः परामृश्यते। प्रवरम्=श्रेयान् श्रेष्ठः पुष्कलः स्याद् सत्तमश्चातिशोभनः" तं प्रवरम्। अगदङ्कारम्=न गदः अगदः, अगदं करोतीति अगदङ्कारः, कर्मण्यण् (३-२-१) अणि विहिते सत्यां च वृद्धौ "कारे सत्यागदस्य" (६-३-७०) इति मुमागमः॥ ६॥

भाषा—बहुत दुःख ही यहां अति चञ्चल भयावह लहरें हैं। उनसे यह संसारसमुद्र दारुण दीख पड़ता है, जिसमें व्याधिरूप मगरमच्छ मनुष्यों को क्षत-विक्षत कर रहे हैं और समुद्धारक दयानन्द सदुपदेश रूपी उत्तमौषध से सब की चिकित्सा कर रहे हैं। भला ऐसे देव दयानन्द के गुणों का कीर्त्तन कौन कर सकता है? कोई नहीं। उनके गुण अपार हैं॥ ६॥

आभासः—अनेकधा निर्वर्ण्य दयानन्दं वेदभाष्यकृतं विवृणोति—

श्रुतीनां सत्योऽर्थः प्रभुवरकृतीनामनुगुणः,
जगत्कल्याणार्थं परमफलदो युक्त्युपचितः।
अहो येन प्रोक्तो निगमविदुषा संयमजुषा,
दयानन्दो वन्द्यः किमिव सदलङ्कार इह नो॥७॥

व्याख्या— अहो= आश्चर्यम्, जगत्कल्याणार्थम्= संसार-हिताय, येन= विख्यातेन, निगमविदुषा= श्रुतिपण्डितेन, संयमजुषा=यमनियमसेविना, प्रभुवरकृतीनाम्=ईश्वरप्रणीतानाम्, श्रुतीनां= आम्नायानाम्, अनुगुण:= वेदानुरूपम्, युक्त्युपचित:= ऊहनिदिग्ध:, परमफलद:= उत्तमोदर्कप्रद:, सत्य:= तथ्य:, अर्थ:= अभिधेय:, प्रोक्त:= विहित:, मदलङ्कार:= सत्पुरुषावतंस:, दयानन्द:= दयारूमृद्धो दयानन्द:, इह= लोके, किमिव= कथम्, नो= निषेधे, वन्द्य:= अभिवाद्य:, नूनं सत्कार्यं इत्याशय: ।

व्युत्पत्ति:– जगत्कल्याणार्थम्= जगत: कल्याणम्, जगत्कल्याणम्, तस्मै जगत्कल्याणार्थम् "अर्थेन नित्यसमासवचनं सर्वलिङ्गता च वक्तव्या" (२ १-३६वा०) । निगमविदुषा= निगमानां विद्वान् निगमविद्वान्, तेन निगमविदुषा । संयमजुषा = संयमं जुषते इति संयमजुट् कर्तरि क्विप्, तेन संयमजुषा । प्रभुवरकृतीनां=प्रभुषु वर: प्रभुवर: तस्य कृतय: प्रभुवरकृतय:, तासां प्रभुवरकृतीनां, श्रुतीनां= "श्रुति: स्त्री वेद आम्नाय:" तासां श्रुतीनाम् अनुगुण:=अनुकूलगुण:, सुप्सुपेति समास: । युक्त्युपचित:=युक्त्या उपाचित: युक्त्युपचित:, "युक्तिरूहस्तर्क: निदिग्धोपचिते" इति कोष: । परमफलद:= परमं च तत्फलम् परमफलं तद्ददातीति परमफलद:, "आतोऽनुपसर्गे क:" (३-२-३)इति क: प्रत्यय:, कित्त्वादाकारलोप:, "आतो लोप इटि च" (६-४-६४) इत्यनेन, "उदर्क: फलमुत्तरम्" । सत्य: = "सत्यं तथ्यमृतं सम्यक्" । प्रोक्त:=प्रकर्षेण उक्त: प्रोक्त: । सदलङ्कार:= सतामलङ्कार: सदलङ्कार:, षष्टि-समास:, "अलङ्कारस्त्वाभरणं परिष्कारो विभूषणम्, पुंस्युत्तंसावतंसौ द्वौ कर्णपूरे च शेखरे" ॥७॥

भाषा—अहो ! संसारहित के लिये वेदों के प्रकाण्ड पण्डित, जितेन्द्रिय जिस दयानन्द ने ईश्वरकृत श्रुतियों का, मन्त्रों का ही प्रमाण

देकर जो तर्क पर खरा उतरनेवाला और कालान्तर में उत्तम फलदायक मन्त्रार्थ किया ; वह सत्पुरुषों में शिरोमणि दयानन्द यहां वन्दनीय क्यों न हो ? ।।७।।

आभासः—महर्षेरुदयोदर्कं वर्णयन् तद्गुणवर्णनासमर्थतां द्योतयति—

विलीनं पाखण्डैः प्रशमितमघैः शान्तमशुभैः,
प्रभूतं सत्कार्यैरुदितमनघार्यैर्यदुदयात् ।
कवीन्द्रैर्वर्णीन्द्र ! प्रतिदिनमयं यन्नुपचयम्,
कथं वर्ण्यो वर्णस्तव तुलितवर्णैरतुलितः ।।८।।

व्याख्या—यदुदयात् = यज्जन्मनः, पाखण्डैः = पाषण्डैः, विलीनम्=अन्तर्हितम्, अघैः=वृजिनैः, प्रशमितम्=अपसृतम्, अशुभैः=अमङ्गलैः, शान्तम = उपरतम्, सत्कार्यैः=उदात्तक्रियाभिः, प्रभूतम्= प्रबभूवे, अनघार्यैः =निष्पापसज्जनैः, उदितम् =उदीये, वर्णीन्द्र = ब्रह्मचारिवरेण्य । प्रतिदिनम्= दिनंदिनम्, उपचयम् = निदेहम्, यन्= गच्छन्, अयम्=एषः, तव= त्वदीयः, अतुलितः =अनुपमः, वर्णः= वर्णनम्, तुलितवर्णैः= परिमिताक्षरज्ञैः, कवीन्द्रैः= कविवरैः, कथम् =किमिव, वर्ण्यः= वर्णनीयः, न कथमपीत्यर्थः ।।८।।

व्युत्पत्तिः- (श्लोकेऽस्मिन् सर्वत्र कर्मणि प्रयोगाः) । यदुदयात्= यस्योदयः यदुदयः तस्मात् यदुदयात् । विलीनम् = लीयतेः कर्मणि क्तः "ओदितश्च (८-२-४५) इति निष्ठानत्वम् । अशुभैः=न शुभम् अशुभम् तैरशुभैः । सत्कार्यैः= सच्च तत्कार्यं

सत्कार्यं तैः सत्कार्यैः । अनघार्यैः=न विद्यते अघो येषु ते अनघाः ते च आर्याः अनघार्याः तैः अनघार्यैः । उदितम्=उदुपसृष्टादेतेः कर्मणि क्तः । वर्णीन्द्रः=वर्णी 'वर्णाद्ब्रह्मचारिणि' (५-२-१३४) इति इनि-प्रत्ययः । वर्णिनामिन्द्रः वर्णीन्द्रः, तत्सम्बुद्धौ । प्रतिदिनम्=दिनंदिनं प्रति प्रतिदिनम्, उपचयम् =उपोपसृष्टात् चिनोतेरच्प्रत्ययः "एरच्" (३-३-५६) उपचयः, तम् उपचयम् "निदिग्धोपचिते" । यन्=एति इति यन् एतेः शतृप्रत्ययः, इणो यण् (५-४-८१) इति यणादेशः, उगित्त्वा-न्नुमागमः-'उगिदचां सर्वनामस्थानेऽधातोः" (७-१-७०) अतुलितः=न तुला अतुला, अतुला सञ्जाता अस्य इति अतुलितः:, तदस्य सञ्जातं तारकादिभ्य इतच् (५-२-३६) इति इतच् प्रत्ययः । तुलितवर्णैः= तुलिताः वर्णा येषां ते तुलितवर्णाः, तैः तुलितवर्णैः कवीन्द्रैः इत्यस्य विशेषणम् । कवीन्द्रैः=कवीनामिन्द्रः कवीन्द्रः, तैः कवीन्द्रैः ॥८॥

भाषा—जिनके प्रचार क्षेत्र में आने से पाखण्डी अन्तर्हित हुए, पाप करने की प्रवृत्ति निवृत्त हुई, अशुभ कृत्य समाप्त हुए, शुभ कर्म प्रत्यक्ष में आये, सत्पुरुषों की वृद्धि हुई, अतः हे वर्णिवरेण्य ! अहर्निश विस्तृत होती हुई उन आपकी अतुल कीर्ति का कवि लोग वर्णमाला के कुछ वर्णों से कैसे चित्रण कर सकते हैं ? ॥८॥

आभासः—अविद्याकूपकर्दमान्तर्गतान् नॄन् समुद्धृत्य विजेतारं दयानन्दमुपश्लोकयति—

अविद्याकूपान्तर्निपतितजनान् पङ्कजटिलान्,
श्रुतीनां निश्रेणिप्रतिमवचसां श्रेणिभिरलम् ।
समुद्धृत्य ज्ञानोज्ज्वलसुकृतमार्गं प्रतिदिशन्,
दयानन्दः स्वामी निगमपथगामी विजयताम् ॥९॥

व्याख्या—अविद्याकूपान्तर्निपतितजनान् = मौढ्यान्धुमध्ये निगडितमनुजान्, पङ्कजटिलान्= शादसङ्कुलान्, श्रुतीनाम्= छन्दसाम्, निःश्रेणिप्रतिमवचसाम् = अधिरोहिणीतुल्य-लपितानाम्, श्रेणिभिः=वीथिभिः, अलम्=पर्याप्तम्, समुद्धृत्य= समादाय, ज्ञानोज्ज्वलसुकृतमार्गम् = बोधप्रदीप्तश्रेयःपदवीम्, प्रतिदिशन् = अवगमयन्, निगमपथगामी = वेदायनचरः, दयानन्दः = एतन्नामाभिधः, स्वामी = मस्करी, विजयताम् = विजयं प्राप्नोतु ॥८॥

व्युत्पत्तिः—अविद्याकूपान्तर्निपतितजनान् = अविद्या एव कूपाः अविद्याकूपाः, "अन्धुरन्धः प्रहिः कूपः" तेषामन्तर्निपतिताः अविद्या-कूपान्तर्निपतिताः, ते जनाः अविद्याकूपान्तर्निपतितजनाः, तान् अविद्याकूपान्तर्निपतितजनान्। पङ्कजटिलान् = पङ्के जटिलाः पङ्कजटिलाः, तान् पङ्कजटिलान्, "निषद्वरस्तु जम्बालः पङ्कोऽस्त्री शादकर्दमौ"। निःश्रेणिप्रतिमवचसाम् = निःश्रेणिभिः प्रतिमानि वचांसि निःश्रेणिप्रतिमवचांसि, तेषां निःश्रेणिप्रतिमवचसाम्, "निःश्रेणिस्त्व-धिरोहिणी" "उक्तिर्लपितं भाषितं वचनं वचः" श्रेणिभिः= "वीथ्यालिरा-वलिः पंक्तिः श्रेणिः" ताभिः श्रेणिभिः। ज्ञानोज्ज्वलसुकृतमार्गम् = ज्ञानेन उज्ज्वलः सुकृतश्च मार्गः ज्ञानोज्ज्वलसुकृतमार्गः, तं ज्ञानो-ज्ज्वलसुकृतमार्गम्। "पुण्यश्रेयसी सुकृतं वृषः"। "अयनं वर्त्ममार्गाध्व-पन्थानः पदवी सृतिः, सरणिः पद्धतिः पद्या वर्तन्येकपदीति च"। प्रतिदिशन्= प्रतिदिशतीति प्रतिदिशन्। निगमपथगामी=निगमानां पन्थाः निगम-पथः, "ऋक्पूरब्धूपथामानक्षे" (५-४-७४) समासान्तोऽकारप्रत्ययः, निगमपथं गन्तुं शीलमस्येति निगमपथगामी ताच्छील्ये णिनिः। स्वामी="मस्करमस्करिणौ वेणुपरिव्राजकयोः" (६-१-५४) ॥८॥

भाषा—अविद्यारूप कूप में पड़कर उसके कीचड़ में लोग धंसे हुवे थे, उनको महर्षि दयानन्द ने वेद-विहित अत्युत्तम वचनों का उपदेश देकर

बाहर निकाला। इस प्रकार ज्ञान से प्रदीप्त धर्म-मार्ग का बोध कराते हुवे वेदपथ के अनुगामी परिव्राजक श्री दयानन्द जी उत्कर्ष लाभ कर रहे हैं ॥६॥

आभासः—अथ महर्षेर्निर्वेदं विवृण्वानः प्रभुभक्त्यतिरेकमाह—

अकार्षीद्या स्वामिन् ! प्रियतमपितृभ्यामपि पृथग्,
भवन्तं या ब्रह्माचरणमपि कर्तुं निरदिशत् ।
ययाऽवेल्लोकस्थं सुतधनकलत्रादिकसुखम्,
तृणं सैशी भक्तिर्दिशतु शिवमुक्तिं जनिमताम् ॥१०॥

व्याख्या—स्वामिन्=ऐश्वर्यसम्पन्न ! या=अनुष्ठिता, भक्तिः =ईश्वरोपासना, भवन्तम्=गुणैर्देदीप्यमानं श्रीमन्तम्, प्रियतमपितृभ्याम् = अतिशयदयितजननीजनकाभ्याम्, अपि= समुच्चये, पृथक्=दूरम्, अकार्षीत्=व्यधित, या ब्रह्माचरणमपि=ब्रह्मचर्यमपि, कर्तुम्=चरितुम्, निरदिशत्=अवावादयत्, यया=अनुष्ठितया, लोकस्थमपि=इह वर्तमानमपि, सुतधनकलत्रादिकसुखम्= तनयवित्तदाराप्रभृतिसातम्, तृणम्=अर्जुनम्, अवेत्=अबुधत्, सा=पूर्वपरामृष्टा, ऐशी=ईश्वरसम्बन्धिनी, भक्तिः=श्रद्धा, जनिमताम्=उत्पत्तिमताम्, शिवमुक्तिम्=मङ्गलकैवल्यम्, दिशतु= अतिसृजतु ॥१०॥

व्युत्पत्तिः—स्वामिन्="स्वामिन्नैश्वर्ये" (५.२.१२६) स्वशब्दान्मत्वर्थे मिनिः प्रत्ययः, स्वामी, तत्सम्बुद्धौ स्वामिन् !, भवन्तम्= 'भातेर्डवतु (उणादि) 'भा' दीप्तौ इत्यस्माद् धातोर्डवतु भवान्, तं भवन्तम् । प्रियतमपितृभ्याम्=माता च पिता च पितरौ "पिता मात्रा" (१.२.७०) इति पितृशब्दः शिष्टः; अतिशयेन प्रियौ प्रियतमौ "अति-

शायने तमब्रिष्ठनौ" (५.३.५५) इति तमप् प्रत्ययः, प्रियतमौ पितरौ प्रियतमपितरौ, ताभ्यां प्रियतमपितृभ्याम्। "दयितं वल्लभं प्रियम्"। ब्रह्माचरणम्=ब्रह्मग आचरणं ब्रह्माचरणम्, ब्रह्माधिगन्तुमुपस्थेन्द्रियसंयमो 'ब्रह्मचर्यम्' अत्राभिप्रेतः। निरदिशत्=न्युपसृष्टाद् दिशतेर्लङ् "अववादस्तु निर्देशो निदेशः शासनं च सः।" लोकस्थम्= लोकोपपदात् तिष्ठतेः "सुपि स्थः" इति कः प्रत्ययः लोकस्थः, तं—लोकस्थम्। सुतधनकलत्रादिकसुखम्=कलत्रमादिर्यस्य तत्कलत्रादिकं शेषाद्विभाषा (५.४.१५४) इति कप् "कलत्रं श्रोणीभार्ययोः" सुतश्च धनश्च सुतधनम्, "आत्मजः तनयः सूनुः-सुतः पुत्रः तनूजनुः" सुतधनं च कलत्रादिकं च सुतधनकलत्रादिकम्, समाहार-द्वन्द्वे एकवचनम्, तदेव सुखं सुतधनकलत्रादिकसुखम्, "शर्मसातसुखानि च"। तत्। तृणम्=तृण्यते भक्ष्यते गवादिभिस्तत्तृणम् 'घञ्' प्रत्ययः 'संज्ञापूर्वको विधिरनित्यः" इति गुणस्य प्रतिषेधः, तत् तृणम् "यवसं तृणमर्जुनम्"। ऐशी=ईशस्येयम् ऐशी, "तस्येदम्" (४.३.१२०) इत्यण्, णित्वाद् वृद्धिः, अण्त्वान्ङीप् ऐशी। जनिमताम्=जनिरेषामस्तीति जनिमन्तः, तेषां जनिमताम्, "जनिरुत्पत्तिरुद्भवः"। शिवमुक्तिम्= शिवा मुक्तिः शिवमुक्तिः, "पुंवत्कर्मधारयजातीयदेशीयेषु" (६.३.४२) इति पूर्वपदस्य पुंवद्भावः, 'श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम्" तां शिवमुक्तिम्। "मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम् ॥१०॥

भाषा—हे योगैश्वर्यसम्पन्न स्वामिन्! जिसने आपको अपने प्रियतम माता-पिता से भी दूर कर दिया, जिसने आपको ब्रह्मचर्यव्रत धारण करने का आदेश दिया, जिसने सांसारिक पुत्र धन स्त्री आदि सुख को तृणतुल्य समझने की प्रेरणा की, वह ईश्वरीय भक्ति देहधारी अन्य मानवों को भी मङ्गल कैवल्य प्रदान करे ॥१०॥

आभास:—इत्थं मनुष्यस्य चरमलक्ष्यं विख्याप्य जगन्मङ्गलकरीं सुकृतपदनेत्रीं शिवरात्रीमभिष्टौति—

कियत्यो नो जाता जगति शिवरात्र्यो ननु पुरा,
कियद्भिर्नाकारि प्रथितशिवरात्रीव्रतविधि: ।
परं सा काप्यासीद् व्रतिवर ! जगन्मङ्गलकरी,
सवित्री ज्ञानानाममृतफलदात्री तव यते ! ॥११॥

व्याख्या=व्रतिवर ! =वर्णिवरेण्य ! यते ! =निर्जितेन्द्रिय !, जगति=संसारे, ननु=अवधारणार्थे, पुरा=अतीतकाले, कियत्य:=कति, शिवरात्र्य:=एतदाख्येन ख्याता: प्रतिवर्षं फाल्गुनकृष्णाचतुर्दश्याम्, नो=न हि, जाता:=व्यतीता:, कियद्भि:=कतिभि:, प्रथितशिवरात्रीव्रतविधि: = प्रख्यातशिवरात्र्यनशनविधानम्, न = नो, अकारि=अन्वस्थायि, परम्=किन्तु, तव=त्वदीया, सा=विस्मयकारिणी, का=काचिद्, अपि=सम्भावनेऽर्थे, जगन्मङ्गलकरी=भुवनहितसाधनी, ज्ञानानाम्=ऐहामुष्मिकलोकप्रबोधानाम्, सवित्री=जनयित्री, अमृतफलदात्री=सुधापरिणामवितरित्री, मुक्तिफलसवित्री चावर्तत ॥११॥

व्युत्पत्ति:—व्रतिवर ! व्रतमस्यास्तीति व्रती "ब्रह्मचारी व्रती वर्णी" व्रतिषु वर: व्रतिवर:, तत्सम्बुद्धौ व्रतिवर ! यते=यतते मोक्षार्थमिति यति: "सर्वधातुभ्य इन्" (उणादि: ४.११७) तदामन्त्रणे यते ! ननु=प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु । पुरा= 'स्यात्प्रबन्धे चिरातीते निकटागमिके पुरा" । कियत्य:=किं परिमाणमासाम् इति कियत्य:, "किमिदंभ्यां वो घ:" (५.२.४०) इति वतुपो वकारस्य

घादेशः, इयादेशे उगित्त्वान्ङीप्। प्रथितशिवरात्रीव्रतविधिः=विधीयत इति विधिः "उपसर्गे घोः किः" (३.३.९२) व्रतस्य विधिः व्रतविधिः, प्रथिता चासौ शिवरात्री प्रथितशिवरात्री कर्मधारये पुंवद्भावः, प्रथितशिवरात्र्यां व्रतविधिः प्रथितशिवरात्रीव्रतविधिः। अकारि= करोतेः कर्मणि लुङ्। अपि=न पियति अपि, पि 'गतौ' इत्यस्मात् क्विप्, आगमशासनस्यानित्यत्वान्न तुक्, "अपिः पदार्थसम्भावनान्ववसर्गगर्हासमुच्चयेषु" (१.४.९६)। जगन्मंगलकरी=मंगलं करोतीति मङ्गलकरी, "कृञो हेतुताच्छील्यानुलोम्येषु (३.२.१९) इति टः, टित्त्वान्ङीप्, जगतो मङ्गलकरी जगन्मङ्गलकरी। आसीत्= अस्तेर्लङ्, "अस्तिसिचोऽपृक्ते" (७.३.९६) इतीडागमः ॥११॥

भाषा—ब्रह्मचारियों के भूषण संन्यासिन्! आपको बोध होने से पूर्व संसार में कितनी ही शिवरात्रियां बीत चुकीं और असङ्ख्यक शैवों ने इस प्रसिद्ध शिवरात्री का व्रत रक्खा, परन्तु आप की वह कोई विचित्र ही लोक की कल्याणकारिणी शिवरात्री सिद्ध हुई, जो विविध ज्ञानों को उत्पन्न करने वाली, अमृत फल देने वाली थी ॥११॥

आभासः—पुनरपि तमेव विषययति—

परब्रह्मप्राप्तौ विमलनिगमाप्तौ सहचरी,
मुनेरन्तर्नेत्राम्बुजदलकुलोल्लासनकरी।
तमोरक्षोहन्त्री सुकृतपदनेत्री तनुभृताम्,
सदा शैवी रात्री परमसुखदात्री भवतु नः ॥१२॥

व्याख्या—परब्रह्मप्राप्तौ = सर्वोत्तमोऽमधिगमे, विमलनिगमाप्तौ = बोधवेदोपलब्धौ, सहचरी =सहाया, मुनेः= वाचंयमस्य,

अन्तर्नेत्राम्बुजदलकुलोल्लासनकरी = अभ्यन्तरलोचनारविन्दपत्र-पङ्क्तिविकासिनी, तनुभृताम् = वपुष्मताम्, तमोरक्षोहन्त्री = अक्रोध-यातुहिंसित्री, सुकृतपदनेत्री = श्रेयःपद्याप्रापयित्री, शैवी = शाम्भवी, रात्री = निशीथिनी, सदा = सर्वस्मिन् काले, नः = अस्माकम्, परम-सुखदात्री = अतिशर्मप्रदा, भवतु = भवतात् ॥१२॥

व्युत्पत्तिः—परब्रह्मप्राप्तौ = परं च तद् ब्रह्म परब्रह्म "ओ३म् खं ब्रह्म" (४०–१६ यजु०) परब्रह्मणः प्राप्तिः परब्रह्मप्राप्तिः, तस्यां पर-ब्रह्मप्राप्तौ "उदयेऽधिगमे प्राप्तिः"। विमलनिगमाप्तौ = विमलाश्च ते निगमाः विमलनिगमाः "वीध्रं तु विमलार्थकम्" निगमा हि स्वभावतो निर्मला भवन्ति, विमलनिगमानामाप्तिः विमलनिगमाप्तिः, तस्यां विमलनिगमाप्तौ। सहचरी = चरतीति चरः "नन्दिग्रहिपचादिभ्यो-ल्युणिन्यचः" (३.१.१३४) इत्यच्, तत्रैव 'चरट्' पाठात् टित्त्वान्ङीप् चरी, सार्धं चरी सहचरी। मुनेः = "वाचंयमो मुनिः" तस्य मुनेः, अन्तर्नेत्राम्बुजदलकुलोल्लासनकरी = अम्बुनि जायते अम्बुजम्, "सप्तम्यां जनेर्डः" (३,२.९७) इति डः प्रत्ययः, नेत्रम्—नीयतेऽनेनेति नेत्रम् "दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे" (३.२.१८२) इति ष्ट्रन्, अन्तः नेत्रम् अन्तर्नेत्रम् सुप्सुपा समासः, अन्तर्नेत्रमेव अम्बुजम् अन्तर्नेत्राम्बुजम्, तस्य दलम् अन्तर्नेत्राम्बुजदलम्, तस्य कुलम् अन्तर्नेत्राम्बुजदलकुलम्, कुलशब्दग्रहणादनेकज्ञानवत्त्वं गम्यते, तस्योल्लासनम् अन्तर्नेत्राम्बुजदलकुलोल्लासनम्, तत्करोतीति अन्त-र्नेत्राम्बुजदलकुलोल्लासनकरी; "कृञो हेतुताच्छील्यानुलोम्येषु" (३.२.२०) इति ताच्छील्ये टः प्रत्ययः, टित्त्वान्ङीप्। तनुभृताम् = तनूर्बिभ्रति ये ते तनुभृतः, कर्त्तरि क्विप्, तेषां तनुभृताम्, "गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः। कायो देहः क्लीबपुंसोः स्त्रियां मूर्त्तिस्तनुस्तनूः"। तमोरक्षो-हन्त्री = तम एव रक्षः तमोरक्षः, "तमसो मा ज्योतिर्गमय" इति तमोऽ-त्राज्ञानमुपादीयते। 'यातुधानः पुण्यजनो नैर्ऋतो यातुरक्षसी" तस्य

हन्त्री तमोरक्षोहन्त्री। सुकृतपदनेत्री=नीयतेऽनया सा नेत्री ष्ट्रन् प्रत्ययः, षित्वान्ङीष्, सुकृतपदम्—सुकृतं च तत्पदं सुकृतपदम्, "पुण्य-श्रेयसी सुकृतं वृषः" तस्य नेत्री सुकृतपदनेत्री। शैवी=शिवस्येयं शैवी "तस्येदम्" (४.३.१२०) इत्यण्, स्त्रियां ङीप्। रात्री="निशा निशीथिनी रात्रिः" "कृदिकारादक्तिनः" (४.१.४५) सूत्रस्थवार्तिकेन ङीष्। सदा="सर्वस्य सोऽन्यतरस्यां दि" (५.३.६) इति दा प्रत्यये सर्वशब्दस्य सादेशः। परमसुखदात्री=ददातीति दात्री कर्त्तरि तृच् "ऋन्नेभ्यो ङीप्" (४.१.५) इति स्त्रियां ङीप्। परमं च तत्सुखं परम-सुखम्, परमसुखस्य दात्री परमसुखदात्री। भवतु=तुह्योस्तातङ्ङा-शिष्यन्यतरस्याम् (७.१.३५) इति विकल्पेन तानङोऽविधिः ॥१२॥

भाषा—पर ब्रह्म की प्राप्ति में और स्वभावतः शुद्ध वेदमन्त्रों के ज्ञान में सहकारिणी एवं मुनि दयानन्द के ज्ञाननेत्र कमल को विकसित करनेवाली, अविद्या राक्षसी का विनाश करनेवाली और धर्मपथ दिखानेवाली शिव-रात्री सदा हमें आत्यन्तिक सुखदायिनी हो ॥१२॥

आभासः—एवं शिवरात्रेर्महिमानं प्रदर्श्य दयानन्दब्रह्मचारिणो ब्रह्मावगत्या औत्सुक्यं प्रदर्शयति—

कदाचित्कान्तारे क्वचिदपि गिरेस्तुङ्गशिखरे,
सहित्वा शैत्यौष्ण्यं मुनिवर ! विचित्योत्तमबुधान्।
यदज्ञासीर्योगं विविधमथ तत्त्वं सुविमलम्,
परब्रह्मप्राप्त्यै प्रथयति तवौत्सुक्यमतुलम् ॥१३॥

व्याख्या—कदाचित्=कर्हिचित्, क्वचित्=कुत्रचित्, कान्तारे =महावने, गिरेः = शैलस्य, तुङ्गशिखरे = उच्छ्रितकूटे (अपि)

शैत्यौष्ण्यम् = शीतलत्वोष्णत्वे, सहित्वा = सोढ्वा, उत्तमबुधान् = योगिप्रवरान्, विचित्य = संवीक्ष्य, मुनिवर ! = स्थितधीवरेण्य ! (त्वं योगिभ्यः) यद्योगम् = यत्समाधिम्, अथ = साकल्येन, विविधम् = नानारूपम्, सुविमलम् = अतिप्रयतम्, तत्त्वम् = रहस्यम्, अज्ञासीः = अवागात्, (तदेतदाचरणम्) तव = तावकीनम्, परब्रह्म-प्राप्त्यै = अनुत्तमोऽमलब्धये, अतुलम् = अपरिमितम् = औत्सुक्यम् = लालसाम्, प्रथयति = विस्तारयति ॥१३॥

व्युत्पत्तिः—कदाचित् = 'चित्'प्रत्ययोऽनिर्धारणे प्राचीनतर-व्याकरणसम्मतः, कदा च चित् च कदाचित् । शैत्यौष्ण्यम् = शीतस्य भावः शैत्यम्, उष्णस्य भावः औष्ण्यम्, शैत्यं च औष्ण्यं च शैत्यौष्ण्यम्, "विप्रतिषिद्धं चानधिकरणवाचि (२.४.१३) इत्येकवद्भावः। सहित्वा = "तीषसहलुभरुषरिषः" (७.२.४८) विकल्पेनेट् । विचित्य = "संवीक्षणं विचयनं मार्गणं मृगणा मृगः" यद्योगम् = यो योगः यद्योगः, "योगः समाधिः" व्यासभाष्यम्, तं यद्योगम् । अथ = "मङ्गलानन्तरा-रम्भप्रश्नकार्त्स्न्येष्वथो अथ" । औत्सुक्यम् = उत्सुकस्य भावः औत्सुक्यम्, "लालसे प्रार्थनौत्सुक्ये" ॥१३॥

भाषा—कभी कहीं भयानक जङ्गल में और कभी ऊंचे पर्वत-शिखर पर सरदी-गरमी सहते हुवे उत्तम योगियों की खोज करके मुनिवर ! दयानन्द !! आपने योगियों से योग और विभिन्न सम्पूर्ण अत्यन्त पवित्र रहस्यों को जाना; यह आपका आचरण परब्रह्म की प्राप्ति के लिये अपरिमित उत्सुकता को प्रकट करता है ॥१३॥

आभासः—अथेदानीं श्रीदयानन्दस्वामिनो विरजानन्दगुरुवर्यस्य प्रियतमशिष्यत्वमुच्यते—

पवित्रार्षग्रन्थाध्ययनपटवः किन्तु बटवो–
मठे शिष्या नासन् प्रवरविरजानन्दयमिनः ।
परं प्रेम्णः पात्रं परममभवस्त्वं कथमये,
गुरोर्विद्या यस्मिन् फलति स हि शिष्यः प्रियतमः ॥१४॥

व्याख्या—किम्=पृच्छायाम्, नु=विकल्पे, प्रवरविरजानन्दयमिनः=वरिष्ठविरजानन्दयोगिनः, मठे=पाठशाले, पवित्रार्षग्रन्थाध्ययनपटवः=निरश्लीलर्षिकृतपुस्तकपठनपेशलाः, बटवः=वर्णिनः, न=नहि, आसन्=अविद्यन्त, अविद्यन्तैवेति भावः; किन्तु=परन्तु, त्वम्=दयानन्दः, परम्=अत्युत्तमम्, प्रेम्णः=स्नेहस्य, पात्रम्=भाजनम्, कथम्=किमिव, अभवः=आसीः । तदत्र हेतुं निर्दिशति—यस्मिन्=यस्मिन्नन्तेवासिनि, गुरोः=उपदेष्टुरनूचानस्य, विद्या=बोधः, फलति=परिपाकमेति, सः=असौ, हि=निश्चयेन, शिष्यः=शासितुमर्हः, प्रियतमः=अतिशयवल्लभः (भवति) ॥१४॥

व्युत्पत्तिः—किम्="किं पृच्छायां जुगुप्सने", नु="पृच्छायां विकल्पे च" प्रवरविरजानन्दयमिनः=प्रवरश्चासौ विरजानन्दः प्रवरविरजानन्दः, स चासौ यमी प्रवरविरजानन्दयमी, तस्य प्रवरविरजानन्दयमिनः । मठे="मठश्छात्रादिनिलयः" । पवित्रार्षग्रन्थाध्ययनपटवः=ऋषिभिः कृताः आर्षाः "कृते ग्रन्थे" (४.३.११६) इत्यण्, ते च ग्रन्थाः आर्षग्रन्थाः, पवित्राश्च आर्षग्रन्थाः पवित्रार्षग्रन्थाः, तेषामध्ययनं पवित्रार्षग्रन्थाध्ययनम्, तत्र पटवः पवित्रार्षग्रन्थाध्ययनपटवः, बटवः "ब्रह्मचारी बटुर्वर्णी" । प्रेम्णः=प्रीणातीति प्रियः "इगुपधज्ञाप्रीकिरः कः" (३.१.१३५) इति कः, प्रियस्य भावः प्रेमा, प्रिय+इमनिच् "प्रियस्थिरस्फिरोरुबहुलगुरु०" (६.४.१५७) इति प्रियशब्दस्य

'प्र' आदेशः, प्रेमा, "सर्वथा ध्वंसरहितं सत्यपि ध्वंसकारणे। यद्भावबन्धनं यूनोः स प्रेमा परिकीर्तितः" तस्य प्रेम्णः। पात्रम्= पात्याधेयमिति पात्रम्। शिष्यः="एतिस्तुशास्वृदृजुषः क्यप्" (३.१.१०९) इति क्यप् प्रत्ययः, "शास इदङ्हलोः" (६.४.३४) इत्युपधाया इत्वम् ॥१४॥

भाषा—गुणनिधान विरजानन्द संन्यासी की पाठशाला में ऋषि-प्रणीत पवित्र पुस्तकों को पढ़ने में तीक्ष्ण बुद्धि अन्य ब्रह्मचारी क्या नहीं थे? थे, परन्तु आश्चर्य तो यह है कि आप ही श्री गुरु विरजानन्द के प्रेमपात्र कैसे हो गये! यही कहना पड़ता है कि जिसके हृदय में आचार्य का ज्ञान निश्चय से विकसित होता है, वह ही प्रियतम शिष्य कहा जाता है ॥१४॥

आभासः—इदानीं कविर्गुरुविरजानन्दं प्रति दयानन्दस्य भक्तिं दर्शयति—

गुरोः स्नानार्थं तत्तरणितनयाम्बूपहरणम्,
मनोवाक्कायैस्सा गुरुचरणसेवा सनियमम्।
उपस्थानं विद्याग्रहणसमये तत्सविनयम्,
तवातुल्यां श्रद्धां प्रकटयति भक्तिं च विमलाम् ॥१५॥

व्याख्या—गुरोः = विद्यामध्यापयितुराचार्यस्य, स्नानार्थम्= शरीरं पवित्रयितुम्, तत्= शुद्धम्, तरणितनयाम्बूपहरणम्=यमुना-नदीनीरानयनम्, मनोवाक्कायैः=चित्तवचननिकायैः, मनसा वाचा कर्मणेत्यर्थः, सा=अनुपमा, सनियमम्=नियमपूर्वकम्, गुरुचरण-सेवा= शिक्षकपदपरिचर्या, सविनयम् = सप्रश्रयम्, उपस्थानम्= उपगत्य स्थितिः, तव=तावकीनाम्, अतुल्याम्=असादृश्यीम्, श्रद्धाम्

आस्थाम्, विमलाम्=निर्मलाम्, च=पादपूरणे प्रयुक्तः, भक्तिम्= सेवाम्, प्रकटयति=आविर्भावयति ।।१५।।

व्युत्पत्तिः—गुरुः=गृणाति विद्याचरणान्युपदिशतीति गुरुः, तस्य गुरोः, तरणितनयाम्बूपहरणम्=तरणितनया यमुनानदी, तस्या अम्बु तरणितनयाम्बु, तस्योपहरणं तरणितनयाम्बूपहरणम्, तत्। मनोवाक्कायैः=मनश्च वाक् च कायश्च मनोवाक्कायाः, तैः मनोवाक्कायैः। सनियमम्=नियमेन सह इति सनियमम्, क्रियाविशेषणम्, सुप्सुपा अव्ययीभावसमासः, "अव्ययीभावे चाकाले" (६.३.८१) इति सहशब्दस्य सादेशः। गुरुचरणसेवा=चरत्यनेनेति चरणः करणे ल्युट्, तौ चरणौ, गुरोश्चरणौ, गुरुचरणौ तयोः सेवा गुरुचरणसेवा। विद्याग्रहणसमये=विद्याया ग्रहणं विद्याग्रहणम्; तस्य समयः विद्याग्रहणसमयः, तस्मिन् विद्याग्रहणसमये। अतुल्याम्=तुलया सम्मिता तुल्या "नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसम्मितेषु" (४.४.९१), न तुल्या अतुल्या, ताम् अतुल्याम्। श्रद्धाम्= श्रत् सत्यं दधातीति श्रद्धा "षिद्भिदादिभ्योऽङ्" (३.३.१०४) इत्यङ्, आकारलोपे ततष्टाप्, तां श्रद्धाम् ।।१५।।

भाषा—गुरुवर्य के स्नानार्थ यमुनानदी का स्वच्छ जल लाना, मन-वाणी तथा कर्म से विनयपूर्वक गुरुचरणों की सेवा करना, विद्या-पठन-काल में विनम्रता से आकर बैठना इत्यादि आचरण आपकी अतुल श्रद्धा और निर्मल भक्ति के परिचायक हैं ।।१५।।

आभासः—महर्षिदयानन्दस्वामिना वेदप्रमाणतः पशुहिंसानुचिता विहितेति उपश्लोकयति—

श्रुतीनां नाम्ना या विमलमखकर्मण्यपि जनैः,
दुराचारैर्हिंसाक्रियत नृपशूनामकरुणैः ।
न हिंस्याद् भूतानीत्यखिलनिगमेषूक्तमिति कः,
विना त्वामीशस्तां मुनिवर ! निषेद्धुं श्रुतिगिरा ॥१६

व्याख्या—श्रुतीनाम् = निगमानाम्, नाम्ना = अभिधानेन, **अकरुणैः** = दयाहीनैः, दुराचारैः=कुत्सिताचरणैः, जनैः = मानवैः, **विमलमखकर्मणि**=पवित्रयागकृत्ये, अपि=गर्हार्थे प्रयुक्तः, नृपशूनाम् =नरजन्तूनाम्, या = पापात्मिका, हिंसा= हत्या, अक्रियत= आदिश्यत, ताम्=अमानवीयाम्, मुनिवर ! =परापरज्ञ !, भूतानि =उत्पन्नजीवान्, न=निषेधे, हिंस्यात्=निहंण्यात्, इति=एवम्, **अखिलनिगमेषु** = अशेषछन्दःसु, उक्तम् = कथितम्, इति=एवं **प्रकारेण**, श्रुतिगिरा=निगमवचसा, निषेद्धुम्=अपाकर्त्तुम्, त्वाम्= श्रीमन्तम्, विना=अन्तरा, कः=सर्वनाम्ना परामर्शः, ज्योतिष्मान् वा प्रजापतिः, ईशः=समर्थः ॥१६॥

व्युत्पत्तिः—श्रुतीनाम् = श्रूयतेऽनया सा श्रुतिः "श्रुयजिस्तुभ्यः करणे" (३.३.९४ सूत्रस्थेन)वार्तिकेन क्तिन्, तासां श्रुतीनाम् । नाम्ना =म्नायते अभ्यस्यते यत् तत् नाम, तेन नाम्ना । अकरुणैः=करोति मनः अनुकूलतायै इति करुणा, न विद्यते करुणा येषु ते अकरुणाः, "गोस्त्रियोरुपसर्जनस्य" (१.२.४८) इति ह्रस्वः, तैरकरुणैः । दुराचारैः =दुष्ठु आचारो येषां ते दुराचाराः, तैः=दुराचारैः। विमलमखकर्म- णि=विमलाश्च ते मखा विमलमखाः, तेषां सम्बन्धि यत् कर्म तद् विमलमखकर्म, तस्मिन् विमलमखकर्मणि । अपि "अपिः पदार्थसम्भा- वनान्ववसर्गगर्हासमुच्चयेषु" (१.४.९६) । नृपशूनाम्=नरश्च पशवश्च

नृपशवः, तेषां नृपशूनाम् । हिंसा=हिंसनमिति हिंसा "गुरोश्च हलः" (३.३.१०३) इति स्त्रियामकारः, ततष्टाप् । अक्रियत=करोतेः कर्मणि लङ् । अखिलनिगमेषु=अखिलाश्च ते निगमाः अखिलनिगमाः, तेषु अखिलनिगमेषु । श्रुतिगिरा=श्रुतीनां गीः श्रुतिगीः, तया श्रुति-गिरा । त्वां विना = "पृथग्विनानानाभिस्तृतीयान्यतरस्याम्" (२.३.३२) इत्यत्र योगविभागाद् द्वितीया विभक्तिः । कः=कचति दीप्यते स्वज्योतिषा (कच्+ड) इति कः—प्रजापतिः । ईशः=ईश् 'ऐश्वर्ये' इत्यस्माद्धातोः, "इगुपधज्ञाप्रीकिरः कः" (३.१.१३५) इति कः प्रत्ययः ॥१६॥

भाषा—वेद का नाम लेकर दया-हीन अनाचारी मनुष्यों द्वारा पवित्र हवन कार्यों में भी मनुष्यों और पशुवों की जो हत्या की जा रही थी, उसे हे पर-अपर का ज्ञान रखने वाले मुनिश्रेष्ठ ! "प्राणियों को मत मारो" यह चारों वेदों में कहा गया है, ऐसा मन्त्रवचनों से निषेध करने में आप के विना कौन समर्थ हुवा, कोई नहीं अथवा प्रजापति ही समर्थ हुवा । ॥१६॥

आभासः—मन्त्रप्रमाणेन स्त्रीशूद्रयोर्वेदपटनेऽधिकारोस्तीत्यत्र महर्षिदयानन्दश्रोत्रियस्य वचः प्रस्तौति—

"स्त्रियो वा शूद्रा वा निगमपठने नो ह्यधिकृताः,"
इति प्रोचुर्येऽज्ञा जडतमधियः स्वार्थनिरताः ।
तदुक्तिप्रत्युक्त्यै यतिवर ! "यथेमाम्" इति यजुः,
श्रुतेः सा कल्याणी परमपितृवाणी निगदिता ॥१७॥

व्याख्या—स्त्रियः=देव्यः, वा=समुच्चये, शूद्राः=ब्राह्मण-क्षत्रियवैश्यवर्णसेवकाः, वा = चार्थे, निगमपठने= छन्दोऽध्ययने,

हि=निश्चयेन, नो=न, अधिकृताः=अधिकारं प्रापिताः, इति=इत्थम्, ये=लोके ख्याताः, जडतमधियः=अतिमूढबुद्धयः, स्वार्थनिरताः=निजप्रयोजनसंसक्ताः, अज्ञाः=बालिशाः, प्रोचुः, प्रवचनं चक्रुः, तदुक्तिप्रत्युक्त्यै = तद्वचनप्रतिवचनाय, यतिवर !=संन्यासिन् ! "यथेमाम्" (२६.२) इति यजुःश्रुतेः=यजुर्वेदात्, सा=स्फुटा, कल्याणी = सर्वहितकारिणी, परमपितृवाणी=ओमवाणी, (भवता) निगदिता=दर्शिता ॥१७॥

व्युत्पत्तिः—निगमपठने=निगमानां पठनं निगमपठनम्, तस्मिन् निगमपठने । अधिकृताः=अध्युपसृष्टात् करोतेः कर्मणि क्तः, तद्बहुवचने अधिकृताः । जडतमधियः=अतिशयेन जडा जडतमा "अतिशायने तमबिष्ठनौ" (५.३.५५) विहिते तमपि "घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः" (६.३.४३) इति ह्रस्वत्वम् । जडतमा धीर्येषां ते जडतमधियः, "स्त्रियाः पुंवद्भाषितपुंस्कादनूङ्०" (६.३.३४) इति पुंवद्भावः । स्वार्थनिरताः=स्वस्मै इति स्वार्थम्, अस्वपदविग्रहः, "अर्थेन नित्यसमासवचनं सर्वलिङ्गता च वक्तव्या" इति तत्पुरुषसमासः "अर्थोऽभिधेय-रै-वस्तु-प्रयोजन-निवृत्तिषु" इति प्रयोजनमभिधातुमत्रार्थशब्दः, स्वार्थे निरताः स्वार्थनिरताः । अज्ञाः=जानन्तीति ज्ञाः "इगुपधज्ञाप्रीकिरः कः" (३.१.१३५) इति कः, न ज्ञाः अज्ञाः । "अज्ञे मूढयथाजातमूर्खवैधेयबालिशाः" । प्रोचुः=प्रोपसृष्टाद् वचतेर्लिट्युसि रूपम् । तदुक्तिप्रत्युक्त्यै=तेषामुक्तिस्तदुक्तिः, तस्याः प्रत्युक्तिः तदुक्तिप्रत्युक्तिः, तस्यै तदुक्तिप्रत्युक्त्यै । परमपितृवाणी=परम् उत्कृष्टं मातीति "आतोऽनुपसर्गे कः"(३.२.४) परमः, परमश्चासौ पिता परमपिता, "सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः" (२.१.६१) इति समानाधिकरणस्तत्पुरुषः, परमपितुर्वाणी परमपितृवाणी, षष्ठीसमासः ॥१७॥

भाषा—"स्त्रियों और शूद्रों को वेद-पढ़ने का निश्चय ही अधिकार नहीं है" ऐसा जो अत्यन्त जडबुद्धि स्वार्थी मूर्ख जन कहते आये हैं, उनके कथन के उत्तर में संन्यासिराज ! "यथेमां वाचं कल्याणीमावदानि जनेभ्यः" यह ईश्वरीय यजुर्वेद की वाणी आपने स्पष्ट उनको दिखाई ।।१७।।

आभासः—साम्प्रतमसौ व्रतिर्योषितः प्रति महर्षेरुपकारमाह—

स्वकन्याभ्यः शिक्षामुपनयनदीक्षामथ जनाः,
प्रयच्छन्ति स्वैरं वरनिगमसिद्धान्तशरणाः ।
विवाहं तासां ते विदधति सुयोग्यायुषि शुभम्,
नृदास्यं प्राप्तायां महदुपकृतं योषिति मुने ! ।।१८।।

व्याख्या—वरनिगमसिद्धान्तशरणाः = श्रेष्ठश्रुतिराद्धान्ताश्रयाः, जनाः = मनुजाः; स्वैरम् = स्वतन्त्रं यथा स्यात्तथा, क्रियाविशेषणम्, स्वकन्याभ्यः = आत्मकुमारीभ्यः, उपनयनदीक्षाम् = ब्रह्मसूत्रव्रत-पालनविधिम्, अथ = तदनन्तरम्, शिक्षाम् = विद्योपादानम्, प्रयच्छन्ति = ददति, ते = निगमानुगामिनः, तासाम् = विद्याभिः प्रयतानाम्, शुभम् = कन्यास्वीकृतवरम्, विवाहम् = उपयमनम्, सुयोग्यायुषि = यौवनावस्थायाम्, विदधति = कुर्वते। हे मुने ! = संन्यासिन् ! नृदास्यम् = नराधीनत्वम्, प्राप्तायाम् = गतायाम् योषिति = स्त्रियाम् (त्वया) महत् = अत्यन्तम्, उपकृतम् = परहितं साधितम् ।।१८।।

व्युत्पत्तिः—वरनिगमसिद्धान्तशरणाः = वराश्च ते निगमाः वरनिगमाः, तेषां सिद्धान्ताः वरनिगमसिद्धान्ताः, ते शरणं येषां ते वरनिगमसिद्धान्तशरणाः, "समौ सिद्धान्तराद्धान्तौ"। प्रयच्छन्ति = प्रोपसृष्टाद् दाण्धातोः शपि पाघ्राध्मास्थाम्नादाण्० (७-३-७८) इति

सूत्रेण यच्छादेशः । नृदास्यम् = दास्या भावो दास्यम्, वर्णदृढादिभ्यः ष्यञ्च (५-१-१२३) इति ष्यञि विहिते 'यस्येति च' (६-४-१४८) इतीकारलोपः, नृणां दास्यम् = नृदास्यम् ॥१८॥

भाषा—पवित्र वेदोक्त वचनों को मानने वाले मनुष्य स्वतन्त्रता से कन्याओं को यज्ञोपवीत संस्कार की दीक्षा और व्यवहार की शिक्षा करते हैं। वे उनका विवाह तरुणावस्था में करते हैं। मुनिराज ! जो ललनाएं मनुष्य की दासी समझी जाती थीं, उनका आपने महान् कल्याण किया है ॥१८॥

आभासः—अथ के के सत्कार्या इति महर्षिमतं निर्दिशति—

पितामाताऽऽचार्योऽतिथिरिति सुदेवाः सुखकराः,
सुदेवी स्त्री भर्त्तुः पतिरपि तदर्च्योऽथ सकलैः ।
स एवेन्द्रो वन्द्यो निखिलसुरनन्द्योऽज इति या,
त्वयोक्ता ज्ञान्यर्चा परमफलदा सैव हि नृणाम् ॥१९॥

व्याख्या—पिता = जनयिता, माता = जनयित्री, आचार्यः = आचारं ग्राहयिता गुरुः, अतिथिः = सूचनामन्तरेण गृहमागतो विद्वान्, इति = इमे, सुदेवाः = पूजनीया देवाः, सुखकराः = आनन्दप्रदाः (विद्यन्ते), भर्त्तुः = पत्नीपालकस्य पुरुषस्य, स्त्री = स्वपत्नी, सुदेवी = पूजनीया देवी, तदर्च्यः = पत्न्यार्चनीयः, पतिः = भर्त्ता, अपि सुदेवः = पूजनीयो देवः (अस्ति) अथ = सर्वान्ते, सकलैः = कृत्स्नैः, स एव = असावेव, निखिलसुरनन्द्यः = अखिलविबुधस्तुत्यः, अजः = जन्मरहितः, इन्द्रः = सम्पत्सम्पन्नः परमेश्वरः, वन्द्यः = अभिवाद्यः, इति = एवम्, त्वया = पुरोवर्तिना, उक्ता = अभिहिता, या = प्रसिद्धा, ज्ञान्यर्चा = विपश्चित्सत्क्रिया (अस्ति), सैव नृणाम् =

नरनारीणाम्, परमफलदा=उत्तमपरिणामदात्री (वर्तते) ॥१९॥

व्युत्पत्तिः—पिता="तातस्तु जनकः पिता।" माता="जनयित्री प्रसूर्माता"। आचार्यः=आचारं ग्राहयतीति निरुक्ते। अतिथिः= न विद्यते गृहमागन्तुं तिथिः यस्य सः अतिथिः। सुदेवाः=सुष्ठु देवाः सुदेवाः, कुगतिप्रादयः (२-२-१८) इति समासः, "सुः पूजायाम्" (१-४-४९) पूजार्थे सुशब्दः, सुखकराः=सुखं करोतीति सुखकरः, कृञो हेतुताच्छील्यानुलोम्येषु (३-२-२०) इति टः प्रत्ययः। तदर्च्यः= अर्च्यः, अर्चितुं योग्यः अर्च्यः, ऋहलोर्ण्यत् (३-१-१२४) इति ण्यत्, तया अर्च्यः तदर्च्यः। निखिलसुरनन्द्यः = निखिलाश्च ते सुराः निखिलसुराः, नन्दितुं योग्यः नन्द्यः, निखिलसुरैर्नन्द्यः निखिलसुर-नन्द्यः। अजः=न जायते इत्यजः, अन्येष्वपि दृश्यते (३-२-१०१) इति डः प्रत्ययः, डित्वाट् टिलोपः। वन्द्यः = वन्दितुं योग्यो वन्द्यः। ज्ञान्यर्चा=ज्ञानमेषामस्तीति ज्ञानिनः, अत इनिठनौ (५-२-११५) इति मत्वर्थे इनिः। ज्ञानिनामर्चा, ज्ञान्यर्चा, अर्चा पुनः 'गुरोश्च हलः' (३-३-१०३) इत्यकारे विहिते टाप्। नृणाम्=नरश्च नार्यश्च नरः, 'पुमान् स्त्रिया' (१-२-६७) इत्येकशेषः, तेषां नृणाम्। परमफलदा= परमं च तत्फलं परमफलम्, 'सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः' (२-१-६१) इति तत्पुरुषकर्मधारयः, तद्ददातीति परमफलदः, 'आतोऽनुपसर्गे कः' (३-२-३) इति कः, आकारलोपे विहिते ततष्टाप् परमफलदा ॥१९॥

भाषा—पिता, माता, आचार्य और अतिथि ये पूजनीय देव हैं, सुख करने वाले हैं। पति के लिए उसकी पत्नी पूज्या देवी है। पत्नी द्वारा सत्कार के योग्य उसका पति भी पूजार्ह देव है और सब जनों से वह ईश्वर ही अखिलदेव, नन्दनीय, अजन्मा, ऐश्वर्य-सम्पन्न, वन्दना करने योग्य है

ऐसा आप से कहा गया विद्वानों का आदर है, वास्तव में वह ही नर-नारियों को फल देने वाला है ॥१६॥

आभासः—अथेदानीं कविवरः ऋषिनिर्दिष्टश्रुति-सिद्धान्ताचरण-फलं निरूपयति—

विशुद्धं सिद्धान्तं निगमगदितं सृष्टिनियमैः,
युतं तर्कोपेतं सकृदुपगताश्चेन्नरवराः ।
परेषामज्ञानोच्छलितमतभाजां छलबलैः,
ग्रहीतुं नो शक्याः कथमपि मुने ! ज्ञाननयनाः ॥२०॥

व्याख्या—मुने ! = स्थितप्रज्ञ !, निगमगदितम् = वेदविहितम् सृष्टिनियमैः = जगन्निर्माणविधानैः, युतम् = मिश्रितम्, तर्कोपितम् = तत्त्वज्ञानार्थमूहोपगतम्, विशुद्धम् = अतिपवित्रम्, सिद्धान्तम् = निश्चितपक्षम्, चेत् = यदि, सकृत् = एकवारम्, नरवराः = मनुष्य-र्षभाः, उपगताः = उपेताः, स्युः = भवेयुः, तर्हि, ज्ञाननयनाः = प्रज्ञा-चक्षुषः, इमे, अज्ञानोच्छलितमतभाजाम् = अविद्योत्पन्नमतमतान्तर-सेवमानानाम्, परेषाम् = अन्येषाम्, छलबलैः = छद्मसामर्थ्यैः, कथम् = केन प्रकारेण, अपि ग्रहीतुम् = उपादातुम्, नो = नहि, शक्याः = शक्तुं योग्याः ॥२०॥

व्युत्पत्तिः—मुने ! = स्थितधीर्मुनिरुच्यते, "गीतायाम्" तत्स-म्बुद्धौ । निगमगदितम् = निगमैर्गदितः निगमगदितस्तम् निगम-गदितम् । सृष्टिनियमैः = सृष्टेर्नियमाः सृष्टिनियमाः, तैः सृष्टिनियमैः । तर्कोपितम् = तर्कैरुपेतः तर्कोऽपेतस्तं तर्कोपितम् । सिद्धान्तम् = सिद्धोऽन्तो यस्य स सिद्धान्तस्तं सिद्धान्तम् । सकृत् = "एकस्य सकृच्च"

(५-४-१९) इत्येकशब्दस्थाने सकृदादेशः, सुच्च प्रत्ययः। नरवराः = नरेषु वराः नरवराः, ते नरवराः। ज्ञाननयनाः = ज्ञानं नयनं येषां, ते ज्ञाननयनाः। अज्ञानोच्छलितमतभाजाम् = अज्ञानेनोच्छलितम् अज्ञानोच्छलितम्, तच्च मतम् अज्ञानोच्छलितमतम्, तद् भजन्ते ये ते अज्ञानोच्छलितमतभाजः "भजो ण्विः" (३-२-६२) इति ण्विः प्रत्ययः, तेषां अज्ञानोच्छलितमतभाजाम्। छलबलैः = छलानि च बलानि च छलबलानि, तैः छलबलैः "कैतवे छलछद्मनी", ग्रहीतुम् = ग्रहोऽलिटि दीर्घः (७.२.३७) इनीटो दीर्घत्वम् ॥२०॥

भाषा—मुने ! वेद में वर्णित सृष्टिनियमों से युक्त, तर्क सहित निर्मल सिद्धान्त को यदि एक वार श्रेष्ठ जन पा गये, तो ज्ञान की आंखें मिल जाने से वे अविद्या के कारण उत्पन्न मतों का आश्रय करने वाले पाखण्डियों के कपट और शक्तिप्रयोगों के द्वारा भी वश में नहीं आ सकते ॥२०॥

आभासः—आर्यकृत्यानि विवृण्वानोऽवतारयति—

इदानीं त्वद्भक्ताः श्रुतिकृतिषु रक्ताः प्रतिपुरम्,
त्वदादिष्टं कार्यं विमलमनसाऽऽर्यं विदधतः।
जनानार्य्यीकुर्वन्त्यनुदिनमहो वैदिकवचः-
प्रभावात्सङ्कल्पस्तव फलति कल्पद्रुम इव ॥२१॥

व्याख्या—इदानीम् = एतर्हि, प्रतिपुरम् = पुरं पुरं प्रति, प्रतिनगरे इत्यर्थः, श्रुतिकृतिषु = छन्दःक्रियासु, रक्ताः = संसक्ताः, त्वद्भक्ताः = भवत्सेविनः, विमलमनसा = प्रयतान्तःकरणेन, त्वदादिष्टम् = श्रीमदाज्ञप्तम्, आर्यम् = गुणैरनुत्तमम्, कार्यम् = कर्तुं योग्यम्

विदधतः=अनुतिष्ठन्तः, वैदिकवचःप्रभावात् = श्रुतिकथनप्रतापात्, अनुदिनम्=प्रत्यहम्, जनान्= मनुजान्, आर्यीकुर्वन्ति = आर्यान् कुर्वते, अहो ! =आश्चर्यम्, तव=त्वदीयः सङ्कल्पः=अभिलाषः, कल्पद्रुमः= यथेच्छफलप्रापणतरुः, इव=सदृशः, फलति= निष्पत्ति करोति ॥२१॥

व्युत्पत्तिः—इदानीम्='दानीं च' (५.३.१८) इदं शब्दाद्दानीं प्रत्ययः। प्रतिपुरम् = 'अव्ययं विभक्ति॰' (२.१.६) इति वीप्सायामव्ययीभावः 'पूः स्त्री पुरीनगर्यौ वा' इति कोषः। श्रुतिकृतिषु=श्रुतीनां कृतयः श्रुतिकृतयः, तासु श्रुतिकृतिषु। विदधतः=व्युपसृष्टाद् 'धा'-धातोः शतृप्रत्ययः 'श्लौ' (६.१.१०) इति द्वित्वे सति 'नाभ्यस्ताच्छतुः' (७.१.७८) इति नुम्प्रतिषेधः। वैदिकवचःप्रभावात्=वेदे भवं वैदिकम्, तद्वचः वैदिकवचः, तस्य प्रभावः वैदिकवचःप्रभावः, तस्मात् वैदिकवचःप्रभावात्। अनुदिनम्="अव्ययं विभक्ति॰" (२.१.६) इति पश्चादर्थेऽव्ययीभावः। आर्यीकुर्वन्ति=अनार्याः आर्याः सम्पद्यन्ते, तान् कुर्वन्ति आर्यीकुर्वन्ति, 'अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्त्तरि च्विः' (५.४.५०) इति च्विः प्रत्ययः, 'अस्य च्वौ' (७.४.३२) इत्यकारस्येत्वम् ॥२१॥

भाषा—इस समय प्रत्येक नगर में वैदिक कृत्यों में लगे हुवे आपके भक्त शुद्ध अन्तःकरण से आप द्वारा दिखाये स्वच्छ कार्यों को करते हुवे वेदवचनों के प्रताप से प्रतिदिन अनार्यों को आर्य बना रहे हैं। आश्चर्य तो यह है कि आपका सङ्कल्प कल्पवृक्ष की भांति फलीभूत हो रहा है ॥२१॥

आभासः—अथ स्वास्थ्यप्रदं शोकापनुदमिष्टकर्माह—

प्रबोध्याग्निं प्रातः प्रतिदिवसमार्याः सुहविषा,
यजन्तः कस्तूरीप्रमुखसुरभिद्रव्यनिवहैः।

लसन्मन्त्रोद्घोषाः पवनगतदोषापहरणम्,

वितन्वाना लोकं विगतगदशोकं विदधते ॥२२॥

व्याख्या—आर्याः=श्रौतकर्माश्रयिणो जनाः प्रतिदिवसम्= अहनि अहनि, प्रातः=प्रभाते, अग्निम्=पावकम्, प्रबोध्य=प्रज्वाल्य, लसन्मन्त्रोद्घोषाः=मन्त्रोच्चारणैर्देदीप्यमानाः, कस्तूरीप्रमुखसुरभि-द्रव्यनिवहैः=मृगनाभिप्रभृतीष्टगन्धवस्तुव्यूहैः, सुहविषा=प्राज्या-ज्येन, यजन्तः=देवपूजामाचरन्तः, पवनगतदोषापहरणम्=अनिला-न्तर्भूतदूषणापसारणम्, वितन्वानाः=विदधतः, लोकम्=भुवनम्, विगतगदशोकम्=निवृत्तव्याधिदुःखम्, विदधते=कुर्वन्ति ॥२२॥

व्युत्पत्तिः—आर्याः = 'ऋहलोर्ण्यत्' (३.१.१२४) 'ऋ' गतौ अस्मात् ण्यति वृद्धौ सत्याम् आर्याः 'गतिश्चात्र ज्ञानार्थः', ज्ञानिन आर्याः। श्रौत्रकर्माश्रयिणो हि आर्या अभिधीयन्ते। प्रबोध्य=प्रोप-सृष्टाद् बुधेर्णिचि लघूपधगुणः, ल्यपि णेर्लोपः। लसन्मन्त्रोद्घोषाः= मन्त्राणामुद्घोषाः मन्त्रोद्घोषाः, लसन्तो मन्त्रोद्घोषैर्ये ते लसन्मन्त्रोद्घोषाः। कस्तूरीप्रमुखसुरभिद्रव्यनिवहैः=कस्तूरी प्रमुखं येषु तानि कस्तूरीप्रमुखानि, कस्तूरीप्रमुखानि सुरभीणि द्रव्याणि कस्तूरीप्रमुखसुरभिद्रव्याणि, तेषां निवहाः कस्तूरीप्रमुखसुरभिद्रव्य-निवहाः, तैः कस्तूरीप्रमुखसुरभिद्रव्यनिवहैः। "मृगनाभिर्मृगमदः कस्तूरीति निगद्यते" सुरभिः = "सुरभिर्घ्राणतर्पणः, इष्टगन्धः सुगन्धिः"। निवहः "समूहो निवहव्यूहसन्दोहविसरव्रजाः।" सुहविषा=सुष्ठु हविः सुहविः, तेन सुहविषा। हविः "घृतमाज्यं हविः सर्पिः"। पवनगतदोषापहरणम् =पवनं गतः पवनगतः "द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः" (२.१.२४) इति द्वितीयातत्पुरुषः। पवनगतो दोषः पवनगतदोषः, तस्मादपहरणम् पवनगतदोषापहरणम् तत्। लोकम्='लोकस्तु भुवने

जने"। विगतगदशोकम् = गदश्च शोकश्च गदशोकौ, विगतौ गदशोकौ यस्य स विगतगदशोकः, तं विगतगदशोकम्। विदधते = व्युपसृष्टाद् दधातेर्लटि प्रथमपुरुषबहुवचनम्, "अदभ्यस्तात्" (७.१.४) इति झस्याद्भावः, टेरेत्वम् ॥२२॥

भाषा—आर्यजन प्रतिदिन प्रातर्वेला में अग्नि प्रदीप्त करते हैं और मन्त्रनाद से शोभा पाते हुवे कस्तूरी आदि सुगन्धित पदार्थों के साथ स्वच्छ घी से यज्ञ रचाते हैं। इस प्रकार वायुदोषों को निकालते हुवे वे समूचे जगत् को रोगरहित बना रहे हैं ॥२२॥

आभासः—अथ दुष्कर्मजन्यविपदासक्तस्य विश्वस्योद्धर्त्तारं दयानन्दमभिष्टौति—

शिलाद्यर्चालीनं निगमकृतिहीनं गतबलम्,
विपदग्रस्तं दीनं विषयजलमीनं प्रविकलम्।
प्रभूतैः पाखण्डैः सकलभुवनं नेतुमुदयम्,
विना त्वां कोऽशक्नोन्निगमवचसा सम्प्रति मुने! ॥२३॥

व्याख्या—शिलाद्यर्चालीनम् = प्रस्तरादिपूजानिरतम्, निगमकृतिहीनम् = मन्त्रक्रियाविरहितम्, गतबलम् = विनष्टशौर्यम्, विपद्ग्रस्तम् = आपदापन्नम्, दीनम् = क्षीणम्, विषयजलमीनम् = रूपरसगन्धस्पर्शभोगवारिवैसारिणम्, प्रभूतैः = प्रचुरैः, पाखण्डैः = नानावेशैः, प्रविकलम् = प्रकर्षेण विह्वलम्, सकलभुवनम् = अखिललोकम्, मुने! = निर्भय!; सम्प्रति = एतर्हि निगमवचसा = आम्नायलपितेन, उदयम् = दीप्तिम्, नेतुम् = प्रापयितुम्, त्वाम् = श्रीमन्तम्, विना = अन्तरेण, कः = अविदितजनः, अशक्नोत् = अक्षमत, न कश्चनेत्यर्थः ॥२३॥

व्युत्पत्तिः—शिलाद्यर्चालीनम्=शिला आदिर्येषां ते शिलादयः, 'पाषाणप्रस्तरग्रावोपलाश्मानः शिलादृषद्'', तेषाम् अर्चा शिलाद्यर्चा, तस्यां लीनम् शिलाद्यर्चालीनम्, तत् शिलाद्यर्चालीनम्। प्रविकलमिति यावत् विशेषणपदानि समारब्धानि— निगमकृतिहीनम्=निगमानां कृतयः निगमकृतयः, ताभिर्हीनम् निगमकृतिहीनम्, तत् निगमकृतिहीनम्। गतबलम्=गतं बलं यस्य तत् गतबलम्, तत् गतबलम्। विपदग्रस्तम्=विपद्भिर्ग्रस्तम् विपद्ग्रस्तम, तत् विपद्ग्रस्तम्। दीनम् =दीयते स्मेति दीनम्, कर्त्तरि क्तः, तत् दीनम्। विषयजलमीनम्= विषया एव जलानि विषयजलानि, तेषां मीनः विषयजलमीनः, तत् विषयजलमीनम् 'मीनो वैसारिणोऽण्डजः'। प्रभूतैः= ''प्रभूतं प्रचुरम्'। पाखण्डैः=पातीति पाः कर्त्तरि क्विप् तं पां खण्डयन्तीति पाखण्डाः, तैः पाखण्डैः, ''पालनाच्च त्रयीधर्मः पाशब्देन निगद्यते, तं खण्डयन्ति ते यस्मात् पाखण्डास्तेन हेतुना'' इत्येवं नानाव्रतधराः नानावेशाः पाखण्डिनो मताः। प्रविकलम्=विगतः कलो व्यक्तध्वनिर्यस्य स विकलः, प्रकर्षेण विकलः प्रविकलः, तत् प्रविकलम्। सकलभुवनम्=कलया सह वर्तमानं सकलम्, भवन्ति भूतान्यस्मिन्निति भुवनम् सकलं च तद् भुवनम् सकलभुवनम्, तत् सकलभुवनम्। विशेष्यपदम्। 'लोकस्तु भुवने जने'। मुनेः! = 'वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते' इति गीतावाक्यम्। सम्प्रति=''एतर्हि सम्प्रतीदानीम्''। निगमवचसा= निगमानां वचः निगमवचः, ''वचनं भाषितं चोक्तिर्व्यवहारो लपितं वचः'' तेन निगमवचसा। उदयम् = ''उदयो दीप्तिमङ्गले'' तम् उदयम्। नेतुम्=नयतेस्तुमुन् नेतुम्। त्वां विना=''पृथग्विनानानाभिस्तृतीयान्यतरस्याम्'' (२.३.३२) इति योगविभागेन द्वितीया विभक्तिः। अशक्नोत्=शक्नोतेर्लङ् ॥२३॥

भाषा—पत्थर आदि की पूजा में लगे हुवे, श्रुतिवाक्यों की अवहेलना

करने वाले, सब सामर्थ्यों से हीन, विपत्तियों में ग्रस्त, सर्वथा क्षय को प्राप्त, विषयभोगरूपी जल की मछली बने हुवे एवं अनेक पाखण्डियों द्वारा सताये गये, सम्पूर्ण संसार को हे निर्भीक ! इस गिरे काल में उन्नत करने के लिए आपके विना कौन समर्थ था ।।२३।।

आभासः—साम्प्रतं वेदप्रचारकं धर्मैश्वर्यकारकमुदात्तत्वद्योतकमानन्दकरं दयानन्दं नमस्यन्नाह—

विलीनानां प्रायो व्यधित निगमानां य उदयम्,
चलं धर्मैश्वर्यं पुनरपि पदं पूर्वमनयत् ।
स्वतन्त्रत्वस्येमं भुवि विमलभावं प्रथितवान्,
दयानन्दं वन्दे किमिव न तमानन्दजननम् ।।२४।।

व्याख्या—यः=आविर्भावयिता (दयानन्दः), प्रायः=बाहुल्यम्, विलीनानाम् = विद्रुतानाम्, निगमानाम् = वेदानाम्, उदयम्= प्रचारम्, व्यधित=अकार्षीत्, चलम्= चञ्चलम्, धर्मैश्वर्यम्= सुकृतवैभवम्, पुनरपि=भूयोऽपि, पूर्वम्=प्राक्तनम्, पदम्= स्थानम्, अनयत्=अलम्भयत्, भुवि=भूम्याम्, स्वतन्त्रत्वस्य= स्वैरित्वस्य, इमम्=एतम्, विमलभावम् निर्मलत्वम्, प्रथितवान् =ततवान्, तम्=परोपकारिणम्, आनन्दजननम्=हर्षोत्पादकम्, दयानन्दम्= एतन्नामकम्, किमिव=कथम्, न=नो, वन्दे= स्तौमि, अभिवादये वा ।।२४।।

व्युत्पत्तिः—विलीनानाम्="विलीनो विद्रुतो द्रुतः" तेषां विलीनानाम्, निगमानाम् = निगम्यते ज्ञायतेऽनेनेति निगमः, तेषां निगमानाम्, उदयम्=उद् इति प्रकर्षेऽर्थे, तत्पूर्वात् 'इण्' गतौ

इत्यस्मात् 'एरच्' (३.३.५६) इत्यच् प्रत्ययः उदयः, तम् उदयम्। व्यधित = व्युपसृष्टाद् दधातेर्लुङ्, 'स्थाघ्वोरिच्च' (१.२.१७) इतीत्वम्, 'ह्रस्वादङ्गात्' (८.२.२७) इति सिज्लोपः। धर्मैश्वर्यम् = "धर्मः स्याद् धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः" धर्मः, तस्य ऐश्वर्यम् धर्मैश्वर्यम्, 'विभूतिर्भूतिरैश्वर्यम्' तत्। भुवि = भवत्यस्मिन्निति भूः, अधिकरणे क्विप्, तस्याम् भुवि। स्वतन्त्रत्वस्य = तन्त्रं प्राधान्यम्, स्वस्य तन्त्रं यत्र स स्वतन्त्रः, तस्य भावः स्वतन्त्रत्वम्, तस्य स्वतन्त्रत्वस्य। "स्वतन्त्रोऽपावृतः स्वैरी स्वच्छन्दो निरवग्रहः" प्रथितवान् = 'प्रथ विस्तारे' अस्माद् धातोः क्तवतुः प्रत्ययः। आनन्दजननम् = जनयतीति जननः कर्त्तरि ल्युः, आनन्दस्य जननः आनन्दजननः, तम् आनन्दजननम्। 'मुत्प्रीतिः प्रमदो हर्षः प्रमोदामोदसम्मदाः, स्यादानन्दथुरानन्दः शर्मसातसुखानि च' ॥२४॥

भाषा—जिसने प्रायः विलुप्त हुवे वेदों का उदय किया प्रचार किया, चञ्चल धन वैभव को पुनः पुरानी प्रतिष्ठा पर पहुंचाया, भूमि पर स्वातन्त्र्य की निर्मलता का विस्तार किया, आनन्द के जनक उस महर्षि दयानन्द की मैं स्तुति क्यों न करूं अथवा क्यों न उसका अभिवादन करूं ॥२४॥

आभासः—अथ पुनरपि जगद्धितैषिणं ब्रह्मनिष्ठं दयानन्दं वन्दमान आह—

नृणां कल्याणं योऽनिशमभिलषन् वेदनिरतः,
प्रचारं वेदानां जगति विचरन्नत्र कृतवान्।
चिदानन्दे देवेऽनवरततरतं ब्रह्मणि विभौ,
दयानन्दं वन्दे निखिलजगदानन्दनमुनिम् ॥२५॥

व्याख्या—यः=कल्याणं चिकीर्षुः, वेदनिरतः=निगमतत्परः। अनिशम्=सन्ततम्, नृणाम्, नरनारीणां, कल्याणम्=भव्यम्, अभिलषन्=अभिकांक्षन्, अत्र=इह, जगति=जगत्याम्, विचरन्=परिभ्राम्यन्, वेदानाम्=छन्दसाम, प्रचारम्=प्रकाशम, कृतवान्=विहितवान्, चिदानन्दे=ज्ञानाह्लादे ब्रह्मणीत्यर्थः, देवे=ज्ञानस्वरूपे, विभौ=सर्वगते, ब्रह्मणि = प्रभौ, अनवरतरतम् = अजस्रलीनम्, तं, निखिलजगदानन्दनमुनिम्=कृत्स्नलोकप्रमोदकरविगतस्पृहम्, दयानन्दम्=महर्षिदयानन्दम्, वन्दे=अभिवादये ॥२५॥

व्युत्पत्तिः– वेदनिरतः "आम्नायो निगमो वेदः, ब्रह्मच्छन्दः, श्रुतिः स्त्रियाम्" वेदेषु निरतः वेदनिरतः। अनिशम् = क्रियाविशेषणेऽस्य नपुंस्कत्वम्। नृणाम्=व्याख्यातपूर्वम्। कल्याणम् = "कल्याणं हेम्नि मङ्गले"। अभिलषन्=अभिलषतीति अभिलषन्। अत्र=सप्तम्यास्त्रल् (५-३-१०) एतच्छब्दस्य इति सप्तम्यास्त्रादेशे रूपम्। जगति= "जगत्स्याद् विष्टपे क्लीबम्"। प्रचारम्=चरतेर्भावे घञ्, अदुपधत्वाद् वृद्धिः, प्रचारः, तं प्रचारम्। चिदानन्दे=चित्-सम्पदादित्वाद् भावे क्विप्, आनन्दः=भावे घञ्, चिच्चासावानन्दः चिदानन्दः, तस्मिन् चिदानन्दे। देवे = दीव्यति आनन्देन क्रीडतीति देवः पचाद्यच् "विद्वांसो हि देवाः" शतपथब्राह्मणे, ज्ञानस्वरूपं ब्रह्मात्राभिप्रेतो देवः, तस्मिन् देवे। विभौ= विप्रसंभ्यो ड्वसंज्ञायाम् (३.२.१८०) इति डु विभुः, तस्मिन् विभौ। अनवरतरतम्=रमते इति रतः, कर्तरि क्तः अनवरतं रतः अनवरतरतः, तम् अनवरतरतम् "शश्वदभीक्ष्णं नित सदा सततमजस्रमिति सातत्ये" इत्यव्ययप्रकरणे आपिशलिः। निखिल जगदानन्दनमुनिम् = निखिलं च तद् जगत् निखिलजगत्, आनन्द तीति आनन्दनः "नन्दिग्रहि पचादिभ्यो ल्युणिन्यचः", इति कर्तरि ल्यु निखिलजगतः आनन्दनः निखिलजगदानन्दनः, मुनिः=दुःखेष्वनुद्विग्न

मनाः, सुखेषु विगतस्पृहः, वीतरागभयक्रोधःस्थितधीर्मुनिरुच्यते, इति गीतायाम्, निखिलजगदानन्दनश्चासौ मुनिः, निखिलजगदानन्दनमुनिः, तं निखिलजगदानन्दनमुनिम् । वन्दे=वदि 'अभिवादनस्तुत्योः' इत्यर्थे वन्दतेर्लटि उत्तमपुरुषैकवचनम् ॥२५॥

भाषा—जो वेद में प्रीतिमान निरन्तर नर-नारियों का हित चाहता हुवा इस जगत् में विचरण करके वेदों का प्रचार कर चुका और जो चिदानन्द ज्ञानस्वरूप सर्वगत ब्रह्म में निरन्तर लीन रहा, उस सकल लोक को प्रसन्न करने वाले मुनिराज दयानन्द को मैं अभिवादन करता हूँ ॥२५॥

आभासः—इदानीं कविरार्यसमाजसंस्थापकं जनसन्तापहारकं जगत्प्रमोदकं दयानन्दं स्तवीति—

विदेशेदेशेऽपि श्रुतिविहितधर्मोन्नतिकृते,
समाजा आर्याणामिह विरचिता येन मुनिना ।
अकार्षीद् यो लोकं गतहृदयशोकं सुकृतिभिः,
दयानन्दं वन्दे सकलभुवनानन्दनगुरुम् ॥२६॥

व्याख्या—येन = सर्वहितैषिणा, मुनिना = दुःखेष्वनुद्विग्नमनसा, श्रुतिविहितधर्मोन्नतिकृते=निगमोपदिष्टकृत्याभ्युदयसाधनाय, विदेशे=अफ्रीकादिस्थाने, देशे=आत्मजन्मभुवि, अपि=समुच्चये, इह = अस्मिन्, आर्याणाम् = श्रुत्यनुगानाम्, समाजाः = सङ्घाः, विरचिताः=विनिर्मिताः । यः=सर्वविदितः, सुकृतिभिः=सत्क्रियाभिः, लोकम् = जगतीम्, गतहृदयशोकम् = अतीतान्तःकरणाधिम्, अकार्षीत्=व्यधित, तं सकलभुवनानन्दनगुरुम्=समस्तजगद्धर्षकरोपदेष्टारम्, दयानन्दं वन्दे=स्तुवे ॥२६॥

व्युत्पत्तिः—मुनिना=दुःखेष्वनुद्विग्नमनाः······ स्थितधीर्मुनिरुच्यते इति गीता, तेन मुनिना। श्रुतिविहितधर्मोन्नतिकृते=श्रुतिषु विहिताः श्रुतिविहिताः, श्रुतिविहिता ये धर्माः श्रुतिविहितधर्माः, उन्नतिं करोतीति उन्नतिकृत्, श्रुतिविहितधर्माणामुन्नतिकृत् श्रुतिविहित-धर्मोन्नतिकृत्, तस्मै, श्रुतिविहितधर्मोन्नतिकृते। समाजाः=संवीयन्ते एषु इति समाजाः। "अजेर्व्यघञपोः" (२.४.५६) इति वीभावाभावः 'अजिव्रज्योश्च' (७.३.६०) कुत्वनिषेधः। विरचिताः=विशेषेण रचिताः, सुकृतिभिः=शोभनाः कृतयः सुकृतयः, ताभिः सुकृतिभिः। गतहृदय-शोकम्=हृदयस्य शोकः हृदयशोकः, गतो हृदयशोको यस्य स गत-हृदयशोकः, तं गतहृदयशोकम् ॥२६॥

भाषा—जिस महर्षि ने वेदनिर्दिष्ट कर्त्तव्य कर्मों की उन्नति के लिये अपने और दूसरे देशों में भी सज्जनों के सङ्घटन किये—आर्यसमाजों की स्थापनाएँ की, जिसने उत्तम क्रियाओं द्वारा संसार को मनस्ताप से मुक्त किया, उस समस्त विश्व के आनन्दप्रद दयानन्द उपदेशक की मैं स्तुति करता हूँ ॥२६॥

अभ्यासः—अथ चिरलुप्तवर्णाश्रमधर्मज्ञापकं यमनियमाचरणैरेक-तोपायबोधकं जगदुद्धारकमृषिं विवृणोति कविः—

चिराल्लुप्तान् वर्णाश्रमनियमधर्मान् गुणकृति-
स्वभावैः कर्त्तव्यान् पुनरपि निबोध्याखिलजनान् ।
मनुष्यैक्योपायं यमनियमधर्माचरणतः,
प्रदर्श्येलां स्वामिन्नमरपदगामिन्नुदधरः ॥ २७॥

व्याख्या—अमरपदगामिन्! = देवस्थानं गन्तः! ब्रह्मपद

गामिन् वा !!, स्वामिन् ! = ऐश्वर्यवन् ! चिरात्=दीर्घकालात्, लुप्तान्=तिरोभूतान्, वर्णाश्रमनियमधर्मान्=वर्णाश्रमप्रतिज्ञाचारान्, गुणकृतिस्वभावैः=सत्त्वरजस्तमोगुणकर्मशीलैः, कर्त्तव्यान्=करणीयान्, पुनरपि=भूयोऽपि, अखिलजनान् = अङ्गमानुषान्, निबोध्य =निर्दिश्य. यमनियमधर्माचरणतः=यमनियमधर्मानुष्ठानतः; मनुष्यैक्योपायम् = मनुजसङ्गमसाधनम्, प्रदर्श्य = ईक्षयित्वा, इलाम्= भुवम्. उदधरः=उदकर्षः ॥२७॥

व्युत्पत्तिः—अमरपदगामिन्=म्रियते इति मरः, कर्त्तरि अच्, ततो नञ् समासः, न मरः अमरः, तत् अमरम्, अमरं पदम् अमरपदम्, तद् गन्तुं शीलं यस्य, स अमरपदगामी, ताच्छील्ये णिनिः, तत्संबुद्धौ अमरपदगामिन् । स्वामिन् = स्वामिन्नैश्वर्ये (५.२.११६) इत्यामिन् प्रत्ययः, तदामन्त्रणे स्वामिन् । वर्णाश्रमनियमधर्मान्= ब्राह्मणक्षत्रियवैश्यशूद्राश्चत्वारो वर्णाः, ब्रह्मचर्यगृहस्थवानप्रस्थसंन्यासाश्चत्वार आश्रमाः, वर्णाश्च आश्रमाश्च वर्णाश्रमाः, तेषां नियमाः वर्णाश्रमनियमाः "नियमो यन्त्रणायां च प्रतिज्ञानिश्चये व्रते" इति 'मेदिनी', तेषां धर्माः वर्णाश्रमनियमधर्माः, तान् वर्णाश्रमनियमधर्मान् । गुणकृतिस्वभावैः = सत्वं रजस्तमः प्रकृतेर्गुणाः, गुणाश्च कृतयश्च स्वभावाश्च गुणकृतिस्वभावाः, तैः गुणकृतिस्वभावैः । यमनियमधर्माचरणतः=अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः यमाः "योगदर्शने", शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः—योगदर्शने "धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः, धीर्विद्यासत्यमक्रोधो दशकं धर्मलक्षणम्" इति दशधर्माः मनुस्मृतौ । यमाश्च नियमाश्च धर्माश्च यमनियमधर्माः, तेषामाचरणम् यमनियमधर्माचरणम्, तस्माद्यमनियमधर्माचरणतः, "तसिप्रकरणे आद्यादिभ्य उपसंख्यानम्" (५.४.४४) सूत्रस्थवार्त्तिकेन तसिः । मनुष्यैक्योपायम् = एकस्य भाव ऐक्यम्, मनुष्याणामैक्यं

मनुष्यैक्यम्, तस्योपायः मनुष्यैक्योपायः, तं मनुष्यैक्योपायम्। प्रदर्श्य =प्रोपसृष्टाद् दर्शयतेः क्त्वा, समासे कृते ल्यबादेशः, णेरनिटीति णिचो लोपः। उदधरः = उदुपसृष्टाद्धरतेर्लङि मध्यमपुरुषैकवचनम् ॥२७॥

भाषा—देवताओं के स्थान पर जानेवाले अथवा ब्रह्मपद को प्राप्त होनेवाले यतिवर्य ! दीर्घसमय से वर्णों और आश्रमों में स्वीकार किये गये अदृष्ट आचारों का एवं गुण कर्म स्वभाव के अनुसार करणीय कर्मों का द्वारा सब मानवों को आपने निर्देश किया और यम नियम तथा आचरण से मनुष्यों में सङ्घटनकारी साधन को दिखाकर आपने पृथिवी का उद्धार किया ॥२७॥

आभासः—मृतभर्तृकानां धेनूनाञ्च पीडामोचकं शिशुशिक्षकमनुपमं दयानन्दं निरूपयन्नाह—

शुचां संहर्त्ताऽलं विधुरविधवानामथ गवाम्,
अनाथानां येषां दिवमुपगता हन्त !! पितरः।
शिशूनामुद्धर्त्ता विनयगुणदाता जनकवत्,
सदा तेषां पाता त्वमिव सुखदाता निगद कः ? ॥२८॥

व्याख्या—हन्त ! =हर्षेऽर्थे, विधुरविधवानाम् = विकलमृतभर्तृकानाम्, अथ = समुच्चये, गवाम्=सौरभेयीनाम्, शुचाम्= पीडानाम्, अलम्=पर्याप्तम्, संहर्त्ता=विनाशयिता, येषाम्= अपरिचितानाम्, अनाथानाम्=असहायानां, पितरः=जनन्यो जनकाश्च, दिवम्=स्वर्गम्, उपगताः=उपेताः, तेषाम्=अमीषाम्, शिशूनाम्=अर्भकानाम्, उद्धर्त्ता=उत्कर्षिता, जनकवत्=पितेव, बिनयगुणदाता = विनम्रताचरणप्रदः, सदा = सर्वदा, पाता=

पालयिता, त्वमिव = त्वादृशः, सुखदाता = सुखयिता, को नरोऽस्तीति, निगद = वद ॥२८॥

व्युत्पत्तिः—विधुरविधवानाम् = विधुरः—विशिष्टा धूः कार्यभारो यस्मिन् सः विधुरः "ऋक्पूरब्धू०" (५.४.७४) इति अः, स्त्रियां टाप् विधुरा, तद्बहुवचने विधुराः, विधवाः—विगतो धवो भर्त्ता यस्याः सा विधवा, तद्बहुवचने विधवाः, विधुराश्च ताः विधवाः विधुरविधवाः, तासां विधुरविधवानाम्। गवाम् "माहेयी सौरभेयी गौरुस्रा माता च शृङ्गिणी", तासां = गवाम्। अलम् "भूषणपर्याप्तिशक्तिवारणवाचकम्"। अनाथानाम् = न विद्यन्ते नाथाः येषां ते अनाथाः, तेषां अनाथानाम्। पितरः = मातरश्च पितरश्च पितरः "पिता मात्रा" (१.२.७०) इत्येकशेषः। दिवम् = दीव्यन्त्यस्मिन्निति दिवु क्रीडायां घञर्थे अधिकरणे कः, तद् दिवम्, नपुंसके लिङ्गे, तत्। शिशूनाम् "पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः" तेषां शिशूनाम्। जनकवत् = इवार्थे वतिः। सदा = "सर्वैकान्यकियत्तदः काले दा" इति दा प्रत्ययः, सर्वस्य सोऽन्यतरस्यां दि (५.३.६) इति दा-प्रत्यये परतः विकल्पेन सादेशः ॥२८॥

भाषा—अहो! विकल विधवाओं और गौवों की पीडा का पर्याप्त विनाश करनेवाला, और जिन असहाय के माता-पिता परलोक पहुंच गये उन बच्चों का उत्कर्ष करनेवाला पिता तुल्य नम्रता, आचार-शिक्षक सदा पालनहार आपके समान सुखकारक भला कौन है, कहो तो, ! कोई नहीं है ॥२८॥

आभासः—अथ महर्षेर्ब्रह्मतेजो निरूपयन्नोङ्कारेण मनोज्ञत्वमाह—

अविद्यारण्यानीदुरिततरुदाहेऽतितरलम्,
महो यस्य ब्राह्मं निटिलगगने भाति विमलम् ।
सरस्वत्यप्यार्या श्रवणमधुरौङ्काररुचिरा,
समं सावित्र्याऽलं जयति पतितोद्धारचतुरा ॥२६॥

व्याख्या—यस्य=दयानन्दस्य, निटिलगगने=कपालान्तरिक्षे, विमलम्=पूतम्, ब्राह्मम्=ब्रह्मसम्बन्धि, महः=ओजः, अविद्यारण्यानीदुरिततरुदाहे=मूढतामहावनपापपादपभस्मीकरणे, अतितरलम् = अतिभास्वरम्, भाति = दीप्यते, तस्य, श्रवणमधुरौङ्काररुचिरा = श्रोत्ररुचिकरोम्मञ्जुला, पतितोद्धारचतुरा=धर्माचारभ्रष्टोन्नतिपेशला, आर्या=अधिगन्तुमर्हा, सरस्वती=भारती, अपि, सावित्र्या = सवितृदेवताकमन्त्रेण गायत्र्या गुरुमन्त्रेणेति यावत्। समम्=सार्धम्, अलम्=द्योतमाना, जयति=समृद्धिमाप्नोति ॥२६॥

व्युत्पत्तिः—निटिलगगने = निटिल एव गगनं निटिलगगनम्, तस्मिन् निटिलगगने । अविद्यारण्यानीदुरिततरुदाहे = अरण्यानी—महदरण्यमरण्यानी 'इन्द्रवरुण०' सूत्रस्थेन 'हिमारण्ययोर्महत्त्वे' इति वार्तिकेनानुगागमः, ततो ङीष्, अविद्या चासावरण्यानी अविद्यारण्यानी, दुरितान्येव तरवः दुरिततरवः, अविद्यारण्यान्यां दुरिततरवः अविद्यारण्यानीदुरिततरवः, तेषां दाहः अविद्यारण्यानीदुरिततरुदाहः, तस्मिन् अविद्यारण्यानीदुरिततरुदाहे । अतितरलम् = अत्यन्तं तरलः अतितरलः "तरलो भास्वरः" इति मेदिनी, स यथा स्यात्तथा अतितरलम्, क्रियाविशेषणपदमेतत्। श्रवणमधुरौङ्काररुचिरा=मधु माधुर्यं रातीति मधुरः "आतोनुपसर्गे कः" (३.२.३) इति कः प्रत्ययान्तः अथवा मधु अस्यास्तीति मधुरः "ऊषशुषिमुष्कमधो रः" (५.२.१०७) इति मत्वर्थीयो

रः, श्रवणे मधुरः श्रवणमधुरः, स च ओङ्कारः श्रवणमधुरोङ्कारः 'ओमाङोश्च' (६.१.९५) इति पररूपेण भाव्यम्; कृतवृद्धिपदमत्र च्युत-संस्कृतिदोषयुक्तमिति हि वैयाकरणाः; श्रवणमधुरोङ्कारेण रुचिरा श्रवणमधुरोङ्काररुचिरा; सा। पतितोद्धारचतुरा=पतितानामुद्धारः पतितोद्धारः, तस्मिन् चतुरा पतितोद्धारचतुरा। "चतुरः पेशलः पटुः"। आर्या='ऋहलोर्ण्यत्' (३.१.१२४) इत्यर्हेऽर्थे ण्यत् प्राप्यर्थोऽत्र 'ऋ' धातुः; ण्यन्तादृटाप् आर्या। सावित्र्या=सविता देवता अस्य "सास्य देवता" (४.२.२४) इत्यण् सावित्रः, ततो ङीप् सावित्री, तया सावित्र्या ॥२९॥

भाषा—जिसके भालरूप आकाश पर पवित्र ब्राह्म तेज अविद्यारूपी घने जङ्गल में उत्पन्न हुवे पाप वृक्षों को भस्म करने के लिये अतिभास्वर प्रदीप्त हो रहा है; श्रवण में मधुर ओङ्कार से आकर्षक और दलितों के हित में चतुर प्राप्त करने योग्य उसकी सरस्वती वाणी भी सावित्री मन्त्र के साथ अत्युत्कर्ष का लाभ कर रही है ॥२९॥

आभासः—सर्वाङ्गेषु गुणशालितां प्रकटयन्नुपश्लोकयति—

मुखेन्दावानन्दो लसति रसनायां मधुरिमा,
दया शान्तस्वान्ते तव नयनयोः प्रेमगरिमा।
करावार्तत्राणे कृतपरिकरौ यस्य च वपुः,
परार्थायोद्युक्तं किमिव न स वन्द्यस्त्वमसि नः ॥३०॥

व्याख्या—यस्य = पूर्ववर्णितस्य, तव = सम्मुखे वर्तमानस्य मुखेन्दौ = वक्त्रविधौ, आनन्दः = हर्षः, रसनायाम् = जिह्वायाम्, मधुरिमा=माधुर्यम्, शान्तस्वान्ते= विषयनिवृत्तान्तःकरणे, दया=

अनुकम्पा, नयनयोः=चक्षुषोः, प्रेमगरिमा=प्रणयगुरुत्वम्, लसति=विराजते, यस्य=परोपकारिणः, करौ=भुजौ, आर्त्तत्राणे=व्यथित-संरक्षणे, कृतपरिकरौ=विहितसमारम्भौ (स्तः), यस्य=हितैषिणः, वपुः=तनुः, च परार्थाय =स्वभिन्नप्रयोजनाय, उद्युक्तम्=तत्परम् (अस्ति), सः=सर्वजगद्धितैषी, त्वम्=प्रत्यक्षे विराजमानः, नः=अस्माकम्, किमिव=कथमिव, वन्द्यः=अभिवाद्यः, नासि=न वर्तसे वर्तस एवेति भावः ॥३०॥

व्युत्पत्तिः—मुखेन्दौ = मुखमिन्दुरिव, 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' (२.१.५६) इत्युपमितसमासः मुखेन्दुः, कोषस्तु—'वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम्' 'विधुः सुधांशुः शुभ्रांशुरिन्दुः कुमुद-बान्धवः'। तस्मिन् मुखेन्दौ। मधुरिमा = मधुरस्य भावः मधुरिमा 'वर्णदृढादिभ्यः ष्यञ् च' (५.१.१२३) अत्र चकारात् इमनिच्। प्रेम-गरिमा = गुरोर्भावः गरिमा 'पृथ्वादिभ्य इमनिज्वा' (५.१.११२) 'प्रियस्थिरस्फिर०' (६.४.१५७) इत्यनेन गुरुशब्दस्य स्थाने गर् आदेशः, प्रेम्णो गरिमा प्रेमगरिमा। कृतपरिकरौ=कृतः परिकरो याभ्यां तौ कृतपरिकरौ, 'परिकरः समारम्भः' इतिशब्दरत्नावली ॥३०॥

भाषा—जिस आपके भीतर से मुखचन्द्र पर प्रसन्नता, वाणी में मधुरता, निष्पापचित्त में दयालुता और आंखों में स्नेह की गुरुता छलकती है, बाह्य आकार मे जिस आपके भुजदण्ड पीड़ितों की रक्षा में तत्पर रहते हैं; जिस आपका शरीर दूसरों के हितसाधन में सज्जित रहता है, ऐसे आप किस के वन्दनीय नहीं हो ॥३०॥

आभासः—अथ गुणागारं दयानन्दं नमस्यन्नाह—

निशान्तं शान्तेस्तं गुणमणिगणानां जलनिधिम्,
क्षमाक्षेत्रं मित्रं सदयहृदयं सत्यसदनम्।

तपोलक्ष्मीरम्यं विबुधवरकाम्यं नृकमलम्,
दयानन्दं वन्दे धृतिधनमनिन्द्यं यतिवरम् ॥३१॥

व्याख्या—शान्तेः = कामक्रोधादिप्रशमस्य, निशान्तम् = निकेतनम्, गुणमणिगणानाम् = गुणरत्नसमुदायानाम्, जलनिधिम् = पयोधिम्, क्षमाक्षेत्रम् = सहनभूमिम्, मित्रम् = सखायम्, सदयहृदयम् = करुणान्वितान्तःकरणम्, सत्यसदनम् = ऋतभवनम्, धृतिधनम् = धीरत्ववित्तम्, तपोलक्ष्मीरम्यम् = पुण्याचरणसम्पद्रमणीयम्, विबुधवरकाम्यम् = विप्रमनोरथकमनीयम्, नृकमलम् = नरारविन्दम्, अनिन्द्यम् = अनवद्यम्, तम् = अभिहितशीलम्, यतिवरम् = परिव्राजकरत्नम्, दयानन्दम् = दयानन्दमस्करिणम्, वन्दे = स्तुवे ॥३१॥

व्युत्पत्तिः—निशान्तम् = निशम्यते विश्रम्यतेऽस्मिन्निति निशान्तः, अधिकरणे क्तः, तं निशान्तम्। गुणमणिगणानाम् = गुणा एव मणयः गुणमणयः, तेषां गणाः गुणमणिगणाः, तेषां गुणमणिगणानाम्। जलनिधिम् = निधीयतेऽत्रेति निधिः 'उपसर्गे घोः किः' (३.३.९२) इति किः प्रत्ययान्तः, जलानां निधिः जलनिधिः, तं जलनिधिम्। क्षमाक्षेत्रम् = क्षमायाः क्षेत्रं क्षमाक्षेत्रम्, तं क्षमाक्षेत्रम्। सदयहृदयम् = दयया सह वर्तते इति सदयम् "वोपसर्जनस्य" (६.३.८२) इति सहशब्दस्य स आदेशः 'ह्रस्वो नपुंसके प्रातिपदिकस्य' (१.२.४७) इति ह्रस्वादेशः, सदयं हृदयं यस्य स सदयहृदयः, तं सदयहृदयम्। सत्यसदनम् = सत्यस्य सदनं सत्यसदनम्, तं सत्यसदनम्। 'सत्यं तथ्यमृतं सम्यक्' 'निशान्तपस्त्यसदनं-भवनागारमन्दिरम्'। धृतिधनम् = दधाति सुखमिति धनम्, धृतिरेव धनं यस्य स धृतिधनः, तं धृतिधनम्। तपोलक्ष्मीरम्यम् = तप एव लक्ष्मीः तपोलक्ष्मीः, तया रम्यः तपोलक्ष्मीरम्यः, तं तपोलक्ष्मीरम्यम्। विबुधवरकाम्यम् = व्रियत इति वरः "तपोभिरिष्यते यस्तु देवेभ्यः स वरो मतः।" विबुधेभ्यो वरः

विबुधवरः, तेन काम्यः विबुधवरकाम्यः, तं विबुधवरकाम्यम् । नृकमलम् = ना कमलमिव नृकमलम्, तं नृकमलम् । यतिवरः= यतिश्चासौ वरः यतिवरः, तं यतिवरम् । दयानन्दम् =दयायामानन्दो यस्य स दयानन्दः, तं दयानन्दम् ।।३१।।

भाषा—शान्ति के निकेतन, गुणरत्नों के समुद्र, सहनशीलता की भूमि, मित्र, दयालुहृदय, सत्य के निवास स्थान, धैर्य के धनी, तपरूप लक्ष्मी से रमणीय, विद्वानों के चाहे जाने से कमनीय, नररूपकमल तुल्य, निष्पाप, उस संन्यासिवरिष्ठ दयानन्द का गुण कीर्तन करता हूँ ।।३१।।

आभासः—अथ सर्वथा निस्पृहं ब्रह्मनिष्ठं सुखकारिणं दयानन्दं निरूपयति—

त्रिलोकीलक्ष्मीरुत्पथयितुमलं नैव यमहो ! !
प्रहारोद्युक्तानां विविधमतभाजामपि नृणाम् ।
कुलादुग्रा भीतिर्विमुखमकरोन्न श्रुतिपथाद्,
यमूर्व्यां स स्वामी परमपदकामी किरतु शम् ।।३२।।

व्याख्या—अहो=विस्मयम्, यम्=ब्रह्मनिष्ठम्, त्रिलोकीलक्ष्मीः = लोकत्रयसम्पत्, उत्पथयितुम् = सत्यमार्गात्प्रच्यावयितुम्, न एव =नहि, अलम् = शक्ता, प्रहारोद्युक्तानाम् = आघातनिरतानाम्, विविधमतभाजाम्=अनेकपक्षसेविनाम्, नृणाम्=नराणाम्, कुलात् =सङ्घात्, उग्रा=तीव्रा, भीतिः=भिया, अपि=समुच्चये, यम्= दृढनिश्चयम्, श्रुतिपथात् = वेदाध्वनः, विमुखम् = निरीहम्, न= निषेधे, अकरोत् = व्यधत्त, सः =असौ, परमपदकामी=अपवर्गा- कांक्षी, स्वामी=यतिः, उर्व्याम्=भुवि, शम्=सुखम्, किरतु= विक्षिपतु ।।३२।।

व्युत्पत्तिः—त्रिलोकीलक्ष्मीः = त्रयाणां लोकानां समाहारः-त्रिलोकी "द्विगोः" (४.१.२१) इति ङीप्, तस्याः लक्ष्मीः त्रिलोकी-लक्ष्मीः सा, उत्पथयितुम्=विपरीतः पन्थाः उत्पथः 'ऋक्पूरब्धूःपथामानक्षे' (५.४.७४) इत्यकारः समासान्तः, उत्पथं कर्तुम् उत्पथयितुम् 'तत्करोति तदाचष्टे' इति णिच् । प्रहारोद्युक्तानाम्=प्रहारे उद्युक्ता ये ते प्रहारोद्युक्ताः, तेषां प्रहारोद्युक्तानाम् । विविधमतभाजाम्=विविधानि मतानि विविधमतानि, तानि भजन्ते विविधमतभाजः, 'भजो ण्विः' (३.२.६२) तेषां विविधमतभाजाम् । नृणाम्="नृ च" (६.४.६) इति दीर्घाभावः । परमपदकामी=परमं च तत्पदं परमपदम् 'सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः' इति कर्मधारयः, तत्कामयते इति परमपदकामी, ताच्छील्ये णिनिः । किरतु = कॄ विक्षेपे, इति धातोर्लटि शविकरणे गुणाभावात् "ऋत इद्धातोः" (७.१.१००) इतीत्वं रपरत्वं च ॥३२॥

भाषा—अहो ! जिस ब्रह्मनिष्ठ को लोकत्रय की लक्ष्मी तथ्यपथ से हटाने में शक्त नहीं हुई, चोट पहुंचाने के लिए उद्यत नाना मतावलम्बियों के जमघटों की तीव्र भीतियां भी जिस दृढनिश्चयी को वेद-मार्ग से विरत न कर सकीं, वह मोक्षकांक्षी स्वामी भूलोक में सुख का सञ्चार करे ॥३२॥

आभासः—श्रौतगाङ्गेयपयोभिर्मानुषमानसान्यभिषिच्य भवतारकस्य दयानन्दस्य महिमानमभिधत्ते कविरिदानीम्—

महादेवोद्भूतामलनिगमविद्यामृतनदी-
वचोऽम्भोभिः पुण्यैर्विषयमदमोहान्धमनसाम् ।
निषिच्यान्तःप्रान्तानुदितसुफलान्तान् व्यधित यः,
क्षितेरुद्धर्त्तुस्ते कथमिव निगद्येत महिमा ॥३३॥

व्याख्या—यः=वेदवादप्रवृत्तः, पुण्यैः = सुकृतैः, महादेवो-द्भूतामलनिगमविद्याऽमृतनदीवचोऽम्भोभिः =शम्भुप्रादुर्भूतावदातश्रुतिबोधसुधासरिद्वाक्यवारिभिः, विषयमदमोहान्धमनसाम् = भोगदर्पममत्वोन्मत्तचित्तानाम्, अन्तः = अभ्यन्तरान्, प्रान्तान् = भागान्, निषिच्य=सेचयित्वा, उदितसुफलान्तान् = लग्नानुत्तमफल-रम्यान्, व्यधित = अकार्षीत्, तस्य क्षितेः = भुवः, उद्धर्त्तुः = उच्छ्रयितुः, ते त्वदीयः, महिमा=महत्त्वम्, कथमिव=कया विधया निगद्येत= अभिधीयेत ॥३३॥

व्युत्पत्तिः—पुण्यैः "पुण्यश्रेयसी सुकृतं वृषः" महादेवोद्भूता-मलनिगमविद्यामृतनदीवचोम्भोभिः = महाँश्चासौ देवः महादेवः. अमलनिगमविद्या = निगमानां विद्या निगमविद्या अमला च सा निगमविद्या अमलनिगमविद्या, 'पुंवत्कर्मधारयजातीयदेशीयेषु' (६.३.४२) इति पुंवद्भावः, महादेवात् उद्भूता अमलनिगमविद्या महादेवोद्भूतामलनिगमविद्या, सैवामृतनदी महादेवोद्भूतामलनिगम-विद्यामृतनदी, तस्या वचांस्येवाम्भांसि महादेवोद्भूतामलनिगम-विद्यामृतनदीवचोऽम्भांसि, तैः महादेवोद्भूतामलनिगमविद्यामृतनदी-वचोम्भोभिः। विषयमदमोहान्धमनसाम् = मदश्च मोहश्च मदमोहौ, विषयाणां मदमोहौ विषयमदमोहौ, ताभ्यामन्धं मनो येषां ते विषय-मदमोहान्धमनसः, तेषां विषयमदमोहान्धमनसाम्। निषिच्य= न्युपसृष्टात् सिञ्चतेः क्त्वायां समासे विहिते ल्यबादेशे सति 'उपसर्गा-त्सुनोति०' (८.३.६५) इति मूर्धन्यादेशः। उदितसुफलान्तान्= उदि-तानि शोभनफलानि उदितसुफलानि, तैः अन्ताः उदितसुफलान्ताः तान् उदितसुफलान्तान्, "अन्तो निर्णयरम्ययोः" ॥३३॥

भाषा—वेद वाद में प्रवृत्त जिस महर्षि ने परमेश्वर से आविर्भूत पवित्र श्रुति-बोधरूपी अमृत नदी के निर्मल वाक्यरूप पानी से भोगों के

घमण्ड और ममत्व से उन्मत्त चित्तों को सींच कर, उनमें अनुत्तम फल उत्पन्न किये और जगत् की उन्नति की। उस आपका गौरव कैसे बखाना जाय ॥३३॥

आभासः—सर्वगुणविलसन्तं तमिदानीं चित्रयन् कीर्तयति—

अवर्ण्यं पाण्डित्यं श्रुतिषु भवतो वाङ्निपुणता,
सभायां शङ्कानां निरसनकलायां कुशलता।
महौदार्यं धैर्यं मनसि वपुषो वीर्यमतुलम्,
गुणः कस्ते नालं गुणिवर! जगन्मोहनकृते ॥३४॥

व्याख्या—श्रुतिषु=आम्नायेषु, भवतः=आयुष्मतः, अवर्ण्यम्=अनिर्वाच्यम्, पाण्डित्यम्=पाण्डिती। सभायाम्=गोष्ठ्याम्, वाङ्-निपुणता=वाणोप्रावीण्यम्। शङ्कानाम्=सन्देहानाम् आक्षेपानां वा, निरसनकलायाम्=निराकरणयुक्त्याम्, कुशलता=पेशलत्वम्। मनसि=हृदि, महौदार्यम्=अतिवदान्यत्वम्, धैर्यम्=धीरत्वम्। वपुषः=कायस्य, अतुलम्=अत्यधिकम्, वीर्यम्=लावण्यं दृढाङ्गत्वं बलं च, (विलसति)। गुणिवर!=गुणवच्छ्रेष्ठ!, ते=तव, कः=कतमः, गुणः=धर्मः, जगन्मोहनकृते=लोकाकर्षार्थम्, नालम्=न प्रभुः ॥३४॥

व्युत्पत्तिः—पाण्डित्यम्=पण्डितस्य भावः "वर्णदृढादिभ्यः ष्यञ्च" (५.१.१२३) इति ष्यञ् आदिवृद्धिः, पाण्डित्यम्। सभायाम्=“समज्या परिषद् गोष्ठी सभासमितिसंसदः” सभा तस्यां सभायाम्। वाङ्निपुणता=निपुणस्य भावः कर्म वा निपुणता 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' (५.१.१२४) निपुणस्य ब्राह्मणादिपाठात्तल् प्रत्ययः

तस्य भावस्त्वतलावित्यधिकारात् । 'तलन्तः' इति लिङ्गानुशासनात् स्त्रियां निपुणताशब्दः । महौदार्यम् = उदारस्य भावः औदार्यम्, महच्च तद् औदार्यम् महौदार्यम् । धैर्यम् = धीरस्य भावः धैर्यम् । गुणिवर ! = गुणा अस्मिन् सन्तीति गुणी भूम्न्यर्थे इनिः, ते गुणिनः, तेषु, गुणिषु वरः गुणिवरः, तत्सम्बुद्धौ गुणिवर ! जगन्मोहनकृते = जगतो मोहनः जगन्मोहनः 'यरोनुनासिकेऽनुनासिको वा' (८.४.४५) इति तकारस्य नकारः, जगन्मोहनं करोतीति जगन्मोहनकृत्, तस्मै जगन्मोहनकृते ॥३४॥

भाषा—वेद मन्त्रों में आपका अप्रतिहत पाण्डित्य, समाज में वाक्-चातुर्य, शङ्का और आक्षेपों के निराकरण में कौशल, चित्त में महती उदारता और धीरता, शरीर में अत्यधिक ओज, दृढता एवं बल सुशोभित है, गुणियों में श्रेष्ठ ! आपका कौन-सा गुण लोगों को आकर्षित करने में समर्थ नहीं है ॥३४॥

आभासः—शास्त्रार्थे सत्यस्याश्रयणाद् विजयमानं दयानन्दमाटीकते—

त्वमेकत्रैकोऽभूरितरदिशि नानामतजुषः,
हरिद्वारे कुम्भोत्सवमनुजवारे यतिजनाः ।
परं ते वेदोक्त्या प्रबलतरयुक्त्या च भवता,
पराभूतास्सर्वे स खलु सकलः सत्यमहिमा ॥३५॥

व्याख्या—हरिद्वारे = हरद्वारे, कुम्भोत्सवमनुजवारे = कुम्भाख्यानन्दावसरनरसमुदाये, एकत्र = एकस्मिन् पार्श्वे, त्वम् = दयानन्दः एकः = असहायः, एकाकी, अभूः = अवतिष्ठाः, इतरदिशि = अन्य-

दीयाशायाम् , नानामतजुषः = विविधसम्प्रदायाश्रयिणः, यतिजनाः = संयमिमानवाः, संन्यासिनः इत्यर्थः अवर्तिषत । परम् = किन्त्वर्थे, भवता = गुणैर्दीप्तिमता श्रीमता ते = अमी, सर्वे = समे, वेदोक्त्या = श्रुतिवचसा, प्रबलतरयुक्त्या = बलवत्तरोपपत्त्या, च पराभूताः = तिरस्कृताः, सः = विजयः, खलु = वाक्यालङ्कारे प्रयुक्तः, सकलः = सर्वः, सत्यमहिमा = तथ्यगौरवम् आसीत् ॥३५॥

व्युत्पत्तिः—हरिद्वारे = हरेर्द्वारम् हरिद्वारम् तस्मिन् हरिद्वारे, तत्र शिवस्य राज्यद्वारमासीदित्यैतिहासिकाः, तच्चेदानीं केषाञ्चिद्-भारतीयानां स्नानार्थं तीर्थमस्ति । कुम्भोत्सवमनुजवारे = कुम्भः—कुं भूमिम् उम्भति जलेन इति पचादित्वात् अच् (कु + उम्भ + अच्) शकन्ध्वादित्वाद् इष्टसिद्धिः, कुम्भे उत्सवः कुम्भोत्सवः, मनुजानां वारः मनुजवारः, कुम्भोत्सवे मनुजवारः कुम्भोत्सवमनुजवारः तस्मिन् कुम्भोत्सवमनुजवारे, एकत्र = एकस्मिन्निति एकत्र 'सप्तम्यास्त्रल्' (५.३.१०) देशेऽर्थे त्रल्प्रत्ययः । एकः = 'एकादाकिनिच्चासहाये'' (५.३.५२) । इतरदिशि = इतरा दिक् इतरदिक् ''सर्वनाम्नो-वृत्तिमात्रे पुंवद्भावः'' तस्याम् इतरदिशि ''दिशस्तु ककुभः काष्ठा, आशाश्च हरितश्च ताः'' नानामतजुषः = नानामतानि जुषन्ते ते नानामतजुषः, ॥३५॥

भाषा—जल से भूमि को पूर्ण करने वाले हरिद्वार सम्बन्धी कुम्भ के आनन्द अवसर पर मनुष्य समुदाय में एक पक्ष में आप अकेले थे । दूसरी दिशा में विभिन्न सम्प्रदाय वाले संन्यासी थे । किन्तु आपने उन सब को वेद वचनों और बलवत्तर तर्कों से तिरस्कृत कर दिया । ऐसा किया जाना, यह सब सत्य का ही महिमा था ॥३५॥

आभासः—अथ राजाधिराजरूपेण महर्षिं प्रदर्शयन्नाह—

त्वमारुह्यौङ्काराश्चितवरपताकं श्रुतिरथम्.
गृहीत्वा तर्केषून्निगममतचापञ्च परमम् ।
समग्रान वादीन्द्रान् प्रबलतमशास्त्रार्थसमरे,
विजित्यौङ्कारोच्चध्वनिबधिरितं लोकमकरोः ॥३६॥

व्याख्या—त्वम् = सर्वत्र ख्यातः, ओङ्काराश्चितवरपताकम् = प्रणवसत्कृतसत्केतनम्, श्रुतिरथम् = छन्दस्स्यन्दनम्, आरुह्य = उद्गत्य, परमम् = उत्कृष्टम्, निगममतचापम् = वेदधर्मधनुः, तर्केषून् = युक्तिसायकान् च गृहीत्वा = उपादाय, प्रबलतमशास्त्रार्थसमरे = अतिप्रचण्डधर्मग्रन्थविषयसङ्ग्रामे, समग्रान् = कृत्स्नान्, वादीन्द्रान् = वावदूकान्, विजित्य = अभिभूय, ओङ्कारोच्चध्वनिबधिरितम् = प्रणवोद्घोषाकर्णितम्, लोकम् = जगत्, अकरोः = व्यधत्थाः ॥३६॥

व्युत्पत्तिः—ओङ्काराश्चितवरपताकम् = अश्चितः = "पूजितेऽश्चितः" ओङ्कारेण अश्चिता ओङ्काराश्चिता, वरा पताका वरपताका, "पुंवत् कर्मधारयजातीयदेशीयेषु" (६.३.४२) इति पुंवद्भावः, ओङ्काराश्चितावरपताका यस्मिन् स ओङ्काराश्चितवरपताकः "स्त्रियाःपुंवद्भाषितपुंस्कादनूङ०" (६.३.३४) इति पूर्वपदस्य पुंवद्भावः, उत्तरपदस्य "गोस्त्रियोरुपसर्जनस्य" (१.२.४८) इति ह्रस्वत्वम् तम् ओङ्काराश्चितवरपताकम् "पताकावैजयन्ती स्यात् केतनं ध्वजमस्त्रियाम्" "ओमाङोश्च" इति पररूपेण भाव्यं न च वृद्धया, ओमोङ्कारयोरभेदात् । श्रुतिरथम् = श्रुतिरेव रथः श्रुतिरथः तं श्रुतिरथम् । निगममतचापम् = निगमानां मतं निगममतम्, तदेव चापः निगममतचापः, तं निगममतचापम् । तर्केषून् = तर्का एव इषवः तर्केषवः, तान् तर्केषून्, प्रबलतमशास्त्रार्थसमरे = प्रकृष्टं बलमस्य प्रबलः, अतिशयेन प्रबलः प्रबल-

तमः, शास्त्रस्य अर्थः शास्त्रार्थः "अर्थो विषयः" शास्त्रार्थोऽस्मिन्नस्तीति शास्त्रार्थः 'अर्श आदिभ्योऽच्' (५.२.१२७) आकृतिगणत्वादच्, शास्त्रार्थ एव समरः शास्त्रार्थसमरः, प्रबलतमः शास्त्रार्थसमरः प्रबलतमशास्त्रार्थसमरः, तस्मिन् प्रबलतमशास्त्रार्थसमरे। वादीन्द्रान् =वदन्तीति वादिनः 'णिनिः' प्रत्ययः तेषु इन्द्राः वादीन्द्राः, तान् वादीन्द्रान्। ओङ्कारोच्चध्वनिबधिरितम् = उच्चैस्त्वमत्रास्तीति उच्चः 'अर्श आदिभ्योऽच्' अव्ययानामिति टिलोपः, उच्चो ध्वनिः उच्चध्वनिः, ओङ्कारस्योच्चध्वनिः ओङ्कारोच्चध्वनिः। बधिरितम् =बधिरोऽस्य सञ्जातः बधिरितः 'तदस्य सञ्जातं तारकादिभ्य इतच्' ओङ्कारोच्चध्वनिना बधिरितः ओङ्कारोच्चध्वनिबधिरितः, तम् ओङ्कारोच्चध्वनिबधिरितम्, "अर्कणितो बधिरितः" अत्रापि ओङ्कार-शब्देन सहकृता वृद्धिश्च्युतसंस्कृतिदोषान्विता ॥३६॥

भाषा - ओङ्कार से सत्कृत सुन्दर पताका वाले वेदरूपी रथ पर चढ़ कर वैदिकधर्म धनुष और तर्क बाणों को ग्रहण करके धर्मग्रन्थ विषयक प्रबलतम सङ्ग्राम में सम्पूर्ण शास्त्रार्थकुशलों को जीत कर आपने ओङ्कार के उच्चध्वनि से सब जनों को बहरा बना दिया ॥३६॥

आभासः—अथ नानामतगर्तनिगडितायात्मोद्धारं ख्यापयन्तं कर्त्तव्याद् विमुक्तं दयानन्दं कीर्त्तयति—

तपश्चर्याशुद्धो निगमगिरि बुद्धो यतिपते !
समस्तार्यावर्तं विविधमतगर्तं श्रितमिमम्।
प्रदर्श्यात्मोद्धारं निगममतसारञ्च शुभदम्,
स्वकर्त्तव्यान्मुक्तः परमसुखयुक्तस्त्वमभवः ॥३७॥

व्याख्या—यतिपते = परिव्राजकाचार्य ! तपश्चर्याशुद्धः = सत्यव्रतादितपोऽपरित्यागपवित्रः, निगमगिरि=वेदवाण्याम्, बुद्धः= अवहितः, विविधमतगर्तम् = विभिन्नसम्प्रदायावटम्, श्रितम्= आश्रितम्, इमम् = अमुम्, समस्तार्यावर्त्तम् = सकलभारतम्, आत्मोद्धारम्=निजोत्थानम्, शुभदम्=हितप्रदम्, निगममतसारम्= वेदधर्मनिष्कर्षम्, च प्रदर्श्य=दर्शयित्वा, त्वम् = प्रत्यक्षः, स्वकर्त्त-व्यात्=आत्मकरणीयात्, मुक्तः = निस्तीर्णः, परमसुखयुक्तः=ओमा-नन्दान्वितः, अभवः=आसीः ॥३७॥

व्युत्पत्तिः—यतिपते = यतीनां पतिः यतिपतिः तदामन्त्रणे यतिपते !, तपश्चर्याशुद्धः=चर+'गदमदचरयमश्चानुपसर्गे' (३.१.१००) इति यत् स्त्रियां टाप् चर्या, तपसः चर्या तपश्चर्या, तया शुद्धः तपश्चर्याशुद्धः, निगमगिरि=निगमानां गीः निगमगीः, तस्यां निगम-गिरि। विविधमतगर्तम् = विविधं मतम् त्रिविधमतम्, तदेव गर्त्तः विविधमतगर्त्तः, तं विविधमतगर्त्तम्। आत्मोद्धारम्=आत्मन उद्धारः आत्मोद्धारः, तम् आत्मोद्धारम्। शुभदम् = शुभं ददातीति शुभदः 'आतोऽनुपसर्गे कः' कित्त्वादाल्लोपः, तं शुभदम्। निगममतसारम् = निगमानां मतं निगममतम्, तस्य सारः निगममतसारः, तं निगम-मतसारम्। प्रदर्श्य = प्रोपसृष्टाद् दर्शयतेः क्त्वो ल्यबादेशः, णिचो लोपश्च। स्वकर्त्तव्यात् = स्वस्य कर्त्तव्यं स्वकर्त्तव्यम्, तस्मात् स्वकर्त्तव्यात्। परमसुखयुक्तः =परम्-उत्कृष्टं माति 'आतोऽनुपसर्गे कः' (३.२.४) इति कः परमः, तस्य सुखं परमसुखम्, तेन युक्तः परमसुख-युक्तः ॥३७॥

भाषा—हे परिव्राजकाचार्य ! सत्यव्रत आदि तप के न छोड़ने से पवित्र, वेद वाणी में निष्णात आपने विभिन्न सम्प्रदायरूप गड्ढों का आश्रय लिये हुवे इस सम्पूर्ण भारत को उसके निज उत्थान का पथ एवं हितप्रद

वेदधर्म का निष्कर्ष बतलाया, जिस से आप अपने कर्त्तव्य से मुक्त होकर ओङ्कार के आनन्द से युक्त हो गये ।।३७।।

आभासः—इदानीं देवलोकादागतं पुनस्तदेव स्थानं यन्तं दयानन्दं निरूपयति—

मुने ! ते दिव्यात्मा सकलजगदात्मातिदयया,
सुदैवादस्माकं भुवि समवतीर्णोऽमरपदात् ।
असन्मार्गे लग्नां विपदुदधिमग्नां जनततिम्,
सुधर्माक्तां कृत्वा पुनरपि सुधर्मालयमयात् ।।३८।।

व्याख्या—मुने != आत्मवित् ! सकलजगदात्मातिदयया = अशेषलोकेशात्यन्तानुकम्पया, ते=तव, दिव्यात्मा=अहिंसादिदिव्यगुणेषु भवः स्वभावः, अस्माकम्=नः, सुदैवात्=सौभाग्यात्, अमरपदात्=देवस्थानात्, भुवि = भूगोले, समवतीर्णः=अवरूढः, असन्मार्गे=विपथे, लग्नाम् = सक्ताम्, विपदुदधिमग्नाम् = व्यसनसरित्पतिरताम्, जनततिम् = जनताम्, सुधर्माक्ताम् = अतिपुण्ययुक्ताम्, कृत्वा=निर्माय, पुनः=भूयः, सुधर्मालयम्=देवसभास्थानम् अयात्=प्राप्नोत् ।।३८।।

व्युत्पत्तिः - मुने ! = "मौनान्न मुनिर्भवति, नारण्यवसनान्मुनिः । स्वलक्षणं तु यो वेद स मुनिः श्रेष्ठ उच्यते" इति महाभारते । तद् आकारणे मुने ! सकलजगदात्मातिदयया = सकलं च तद् जगत् सकलजगत्, तस्य आत्मा सकलजगदात्मा, अतिदया=अत्यन्तं दया अतिदया, तस्य अतिदया सकलजगदात्मातिदया, तया सकलजगदात्मातिदयया । दिव्यात्मा = दिवि भवः दिव्यः, आत्मा—अतति

सन्ततभावेन जाग्रदादिसर्वावस्थासु अनुवर्तते इति आत्मा = स्वभावः, दिव्यश्चासावात्मा दिव्यात्मा। सुदैवात्=दैवात् नियतादागतं दैवं भाग्यम् "ततः आगतः" (४.३.७४) इत्यण्, शोभनं दैवं सुदैवम् तस्मात् सुदैवात्, हेतौ पञ्चमी। अमरपदात् = पद्यते प्राप्यते इति पदम्, अमरस्य पदम् अमरपदम्, तस्मात् अमरपदात्, "अमरो देवः" असन्मार्गे = न सन् असन् स चासौ मार्गः असन्मार्गः, तस्मिन् असन्मार्गे। विपदुदधिमग्नाम् = विपद् एवोदधिः विपदुदधिः, तस्मिन् मग्ना = विपदुदधिमग्ना, तां विपदुदधिमग्नाम्। जनततिम् = "ततिः-श्रेणी" जनानां ततिः जनततिः, तां जनततिम्। सुधर्माक्ताम् = शोभनो धर्मः सुधर्मः, तेन अक्तः सुधर्माक्तः, ताम् सुधर्माक्ताम्। सुधर्मालयम् = सुष्ठु धर्मो यत्र सुधर्मा 'देवसभा' "धर्मादनिच् केवलात्" (५.४.१२४) इति अनिच्, तस्या आलयः सुधर्मालयः तं सुधर्मालयम् ॥३८॥

भाषा—वीतराग संन्यासिन्! सम्पूर्ण ब्रह्माण्ड में व्यापक प्रभु की असीम करुणा से अहिंसा आदि दिव्य गुणों में वर्तमान आपका स्वभाव हमारे सौभाग्य के कारण देव स्थान से भूगोल में उतरा और उलटे मार्ग में फंसी हुई, व्यसनसमुद्र में डूबी हुई जनता को अति पुण्यशालिनी बनाकर फिर देवसभा स्थान में पहुंच गया ॥३८॥

आभासः—सम्प्रति धैर्यधुरीणं दयानन्दमकान्दिशीकमुपन्यस्यति-

त्वदीयो दिव्यात्मा श्रुतिपरमतत्त्वार्थकथने,
मनाङ् नाप्तो भीतिं क्वचिदपि जगन्मङ्गलरतः।
नितान्तं शान्ता ते वदनकमलान्तर्धृतिमती,
प्रसन्ना कल्याणी विलसति सुवाणी फलवती ॥३९॥

व्याख्या—त्वदीयः=तावकीनः, दिव्यात्मा=गुणैर्बृंहज्जीवात्मा, जगन्मङ्गलरतः = लोककल्याणव्यापृतः (सन्), श्रुतिपरमतत्त्वार्थ-कथने = मन्त्रोत्तममूलशब्दाशयाभिधाने, क्वचिदपि = क्वापि, मनाक् = लघु, भीतिम् = त्रासम्, न आप्तः न व्याप्तः । ते = तव, नितान्तम्=सर्वथा, शान्ता = दोषेभ्य उपरता वदनकमलान्तर्धृति-मती=वक्त्रारविन्दगतधैर्यवती, प्रसन्ना, उल्लासपूर्णा, कल्याणी= हितैषिणी, फलवती=फलेग्रहिणी, सुवाणी=शोभना वाक्, विलसति =देदीप्यते ॥३९॥

व्युत्पत्तिः— त्वदीयः = तव अयम् इति त्वदीयः । श्रुतिपरम-तत्त्वार्थकथने = परमं तत्त्वं परमतत्त्वम्, तस्यार्थः परमतत्त्वार्थः, श्रुतेः परमतत्त्वार्थः श्रुतिपरमतत्त्वार्थः, तस्य कथनं श्रुतिपरमतत्त्वार्थ-कथनम्, तस्मिन् श्रुतिपरमतत्त्वार्थकथने । वदनकमलान्तर्धृतिमती= वदनं कमलमिव वदनकमलम्, उपमितसमासः, तस्यान्तः वदनकम-लान्तः, धृतिरस्या अस्तीति धृतिमती प्रशंसायां मतुप्, वदनकमलान्तः धृतिमती वदनकमलान्तर्धृतिमती ॥३९॥

भाषा—आपका गुणों से विभूषित महान् जीवात्मा लोक कल्याण में लगा हुवा मन्त्रों के उत्तम मूल शब्दों के आशय कहने में कहीं भी थोड़े त्रास को प्राप्त नहीं हुवा, तेरी सर्वथा दोषों से रहित मुखरूपी कमल के बीच वर्तमान धैर्यशालिनी आनन्दपूर्णा हितकारिणी फलदायिनी वाणी विराजमान हो रही है ॥३९॥

आभासः—अथ यस्य महिम्नो विविधविद्याप्रचारस्तं निरूप-यितुमाह—

क्वचिद् वेदाध्याये नियमितधियो वर्णिनिवहाः,
क्वचिद् योगाभ्यासोल्लसितमनसो योगिविबुधाः ।

क्वचिद् ब्रह्मज्ञानप्रवचनचणः पण्डितगणः,

सुधर्मः साम्राज्यं प्रथयति तवेत्थं सुमहसा ॥४०॥

व्याख्या—क्वचित् = कुहचित्, वर्णिनिवहाः = व्रतिव्राताः, वेदाध्ययने=निगमनिपठे, नियमितधियः=निरुद्धबुद्धयः (विद्यन्ते), क्वचित् = कुत्रचित्, योगिविबुधाः = समाधिमज्ज्ञाः, योगाभ्यासोल्लसितमनसः =अन्तर्ध्यानावृत्तिहर्षितहृदयाः (वर्तन्ते), क्वचित्= कस्मिंश्चित्प्रदेशे पण्डितगणः = विपश्चिच्चयः, ब्रह्मज्ञानप्रवचनचणः = ओमावगतिव्याख्यापेशलः (दृश्यते), इत्थम् = अनेन विधिना, तव=ते, सुमहसा=अतितेजसा, सुधर्मः = वेदविद्या, साम्राज्यम्= पूर्णाधिकारम्, प्रथयति=तनोति ॥४०॥

व्युत्पत्तिः—क्वचित् = क्व-"किमोऽत्" (५.३.१२) इति अत्, ततः "क्वाति" (७.२.१०५) इति क्वादेशः, क्व च चिच्च क्वचित्। वर्णिनिवहाः = "वर्णाद्ब्रह्मचारिणि" (५.२.१३४) वर्णी, वर्णिनां निवहाः वर्णिनिवहाः। वेदाध्ययने = वेदानामध्ययनं वेदाध्ययनम्, तस्मिन् वेदाध्ययने। नियमितधियः = नियमः संजातोऽस्या सा नियमिता, नियमिता धीः येषां ते नियमितधियः। योगिविबुधाः= योगोऽस्यास्तीति योगी मत्वर्थे इनिः, योगिनश्च ते विबुधाः योगिविबुधाः। योगाभ्यासोल्लसितमनसः= योगस्याभ्यासः योगाभ्यासः, तेन उल्लसितानि मनांसि येषां ते योगाभ्यासोल्लसितमनसः। पण्डितगणः=पण्डा-बुद्धिः संजाता एषां ते पण्डिताः, "तदस्य सञ्जातं तारकादिभ्य इतच्" इतीतच् प्रत्ययः, पण्डितानां गणः पण्डितगणः। ब्रह्मज्ञानप्रवचनचणः = ब्रह्मणो ज्ञानं ब्रह्मज्ञानम्, तस्य प्रवचनं ब्रह्मज्ञानप्रवचनम्, तस्मिन् चणः ब्रह्मज्ञानप्रवचनचणः। इत्थम्= "इदमस्थमुः' (५.३.२४) इदंशब्दात्प्रकारवचने थमुः। सुमहसा=

शोभनं महः सुमहः तेन सुमहसा । सुधर्मः = शोभनो धर्मः सुधर्मः । साम्राज्यम्=सम्राजो भावः साम्राज्यम् ष्यञ् ।।४०।।

भाषा—कहीं ब्रह्मचारी-समाज वेद पढ़ने में लगे हैं, कहीं विद्वान् योगी अन्तर्ध्यान की आवृत्ति से प्रसन्न चित्त हैं, कहीं पण्डितगण ईश्वरीय ज्ञान के व्याख्यान करने में कुशल दीखते हैं, इस प्रकार आपके तेज से वेद विद्या अपना पूर्ण अधिकार फैला रही है ।।४०।।

आभासः—अथाचार्यदयानन्दस्याविर्भावमहिमानं दर्शयति—

व्रतित्वानुष्ठानं गुरुकुलनिवासः श्रुतिविदाम्,
गुरूणामास्येन्दोरमृतमयवेदाद्यधिगमः ।
रसास्वादानन्दः सुरगिरि निबद्धामलगिराम्,
कथं नः स्याद्भाग्ये जननमभविष्यन्न यदि ते ।।४१।।

व्याख्या—यदि=यद्युवा, ते=तव, जननम्=प्रादुर्भावः नाभविष्यत् (तर्हि) नः=अस्माकम्, भाग्ये=भागधेये, व्रतित्वानुष्ठानम् =ब्रह्मचर्यचरणम्, गुरुकुलनिवासः = आचार्यान्तेवासित्वम्, श्रुतिविदाम = निगमज्ञानाम्, गुरूणाम् = शिक्षकानाम्, आस्येन्दोः = आननिशापतेः, अमृतमयवेदाद्यधिगमः = सुधाभरितश्रुत्यादिप्रापणम्, सुरगिरि = देववाण्याम्, निबद्धामलगिराम् = रचितप्रयतकाव्यानां च, रसास्वादानन्दः = रसरसनसम्मदः, कथम्=किमिव, स्यात्=भवेत्, न भवेदित्यर्थः ।।४१।।

व्युत्पत्तिः—यदि = "यद्युवेति निपातसमुदायो यद्यर्थे" व्रतित्वानुष्ठानम्=व्रतमस्यास्तीति व्रती, तस्य भावः व्रतित्वम्, तस्यानुष्ठानं व्रतित्वानुष्ठानम् । श्रुतिविदाम् = श्रुतीर्विदन्तीति श्रुतिविदः, तेषां

श्रुतिविदाम् । आस्येन्दोः = आस्यमिन्दुरिवेति आस्येन्दुः तस्मात् आस्येन्दोः । अमृतमयवेदाद्यधिगमः = अमृतमयः प्राचुर्येमयट् अमृतमयस्य वेदादेरधिगमः अमृतमयवेदाद्यधिगमः । सुरगिरि = सुराणां गीः सुरगीः, तस्यां सुरगिरि । निबद्धामलगिराम् = निबद्धा अमला गीः यैः, तानि काव्यानि, तेषां निबद्धामलगिराम् । रसास्वादानन्दः = रसस्य आस्वादः रसास्वादः, तस्यानन्दः रसास्वादानन्दः ।।४१।।

भाषा—यदि आपका प्रादुर्भाव न होता, तो हमारे भाग्य में ब्रह्मा-चरण, गुरुकुल निवास, वेदवेत्ता गुरुवों के मुख रूप चन्द्रमा से अमृतपूर्ण वेदादि का पठन, देव वाणी में रचित पवित्र काव्यों के रसा-स्वाद का आनन्द कैसे होता ? ।।४१।।

आभासः—अथ महर्षेर्ब्रह्मचर्यगरिमाणं दर्शयन् तदुदर्कं प्रकथयति—

विषह्यातिक्लेशान् कठिनतरकायस्तव मुने !
न शैत्यं नैवौष्ण्यं गणयति बुभुक्षां न च तृषम् ।
सदा तेजस्तस्मिन् स्फुरति विमलं संयमभवम्,
व्रतित्वस्यादर्शस्त्वमिव जयसि त्वं भुवि महान् ।।४२।।

व्याख्या—मुने ! = वीतभीते ! तव = त्वदीयः, कठिनतर-कायः = वज्रोपमदेहः, अतिक्लेशान् = विपुलकष्टान्, विषह्य = सहित्वा, न, शैत्यम् = शीतत्वम्, न, एव, औष्ण्यम् = उष्णत्वम्, न, बुभुक्षाम् = अशनायाम्, तृषम् = पिपासां च, गणयति = कलयति, तस्मिन् = अमुष्मिन्, सदा = सर्वस्मिन् काले, संयमभवम् = आत्म-नियन्त्रणोद्गतम्, विमलम् = अवदातम्, तेजः = दीप्तिः, स्फुरति =

स्फूर्ति करोति, (अयं) व्रतित्वस्य = वर्णित्वस्य, महान् = उत्तमः, आदर्शः=प्रतिमा, (एवं) भुवि=जगति, त्वमिव त्वम् = त्वत्सदृशस्त्वम्, इत्यनन्योपमा, जयसि=उत्कर्षमेषि ।।४२।।

व्युत्पत्तिः—कठिनतरकायः = अधिकः कठिनः कठिनतरः, स चासौ कायः कठिनतरकायः। अतिक्लेशान् = अत्यन्तं क्लेशाः अतिक्लेशाः, तान् अतिक्लेशान्। विषह्य = विपूर्वात् सहतेर्ल्यप् "परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम्" (८.३.७०) इति मूर्धन्यादेशः। शैत्यम् = शीतस्य भावः शैत्यम् ष्यञ्, तथैव औष्ण्यम्। बुभुक्षाम् = भोक्तुमिच्छा बुभुक्षा, तां बुभुक्षाम्। तृषम् = तृष्यतेः क्विप् तृट्, तां तृषम्। संयमभवम् = संयमाद्भवः संयमभवः, तत् संयमभवम्—तेजसो विशेषणम् ।।४२।।

भाषा—मुनिवर ! आप निडर है। आपका वज्रसमान शरीर अनेक कष्टों को सहकर न शीत, न उष्ण, न भूख, और न प्यास को कुछ समझता है। उसमें प्रतिक्षण आत्मनियन्त्रण से आविर्भूत निर्मल दीप्ति स्फुरित होती दीख पड़ती है। यह ब्रह्मचर्य का महान् आदर्श है। इस प्रकार जगत् में आप स्वयं आपके ही तुल्य उत्कर्ष पा रहे हैं। (कोई व्यक्ति ऐसा नहीं जिस से आपकी तुलना की जा सके) ।।४२।।

आभासः—अथ विषपायिनि जगन्नाथपाचकेऽनुकम्पां प्रदर्शयन्तं श्रीदयानन्दं श्लाघते—

"यदि स्या विज्ञातो मरणमिह ते प्राप्तमिति" यो,
विषाद्यैर्हन्तारं विदितमनुजं प्रत्युत निजम्।
प्रदायातिद्रव्यं परपुरमहो !! प्रैषयदसौ,
क्षमाया आदर्शस्त्वमिव जगति त्वं विजयसे ।।४३।।

व्याख्या—यदि=यद्युवा (त्वम्), विज्ञातः=विश्रुतः, स्याः=भवेः (तर्हि), इह=अस्मिन्नेव स्थाने, ते=तव (सूदस्य) मरणम्=प्राणहरणम्, प्राप्तम्=समागतम् (विद्धि), इति=एवम् (अभिधाय) यः = करुणापरः, असौ = दयानन्दः, विषाद्यैः = विषशर्करादुग्धैः कालकूटादिभिर्वा, हन्तारम्=वधकम्, विदितमनुजम्=अवबुद्धमानुषं (जगन्नाथम्) (प्रति सहिष्णुतां दधौ, नैतावदेव) प्रत्युत = अपितु, निजम् =आत्मनीनम्, अतिद्रव्यम् =महद्धनम्, प्रदाय=समर्प्य, अहो = अति विस्मयः, (अस्ति यत्तं जीवनवियोक्तारम्) परपुरम्=अपरदेशम्, प्रैषयत्=व्यसृजत्, (अतः) जगति= संसृतौ, त्वमिव=त्वत्तुल्यः, क्षमायाः=सहनशीलतायाः, आदर्शः = प्रतिमानम्, त्वम्=प्रत्यक्षं त्वमेव, विजयसे (उत्कर्षमाप्नोषि) ॥४३॥

व्युत्पत्तिः—यदि = सम्भावनेऽर्थे प्रयुक्तः, यद्युवेति पर्यायः। विज्ञातः = विपूर्वाज्जानातिः प्रसिद्धेऽर्थे वर्तते, ततः कर्मणि क्तः, विज्ञातः। स्याः=अस्तेर्विधिलिङि सिपि यासुटो ङित्त्वाद् अल्लोपः। विषाद्यैः=अद्यते ये ते आद्ये कर्मणि घञ्, विषं चाद्ये च विषाद्यानि, तैः विषाद्यैः; अथवा आदौ भवम् "दिगादिभ्यो यत्" (४.३.५४) आद्यम्, विषमेवाद्यं विषाद्यम् तैः विषाद्यैः। विदितमनुजम् = विदितश्चासौ मनुजः विदितमनुजः, तं विदितमनुजम्। प्रत्युत = प्रति च उत च प्रत्युत वैपरीत्यमित्यर्थः। निजम् = निश्चयेन जायत इति निजम्, तत्। अतिद्रव्यम् = अत्यन्तं द्रव्यम् अतिद्रव्यम्, सुप्सुपेति समासः। परपुरम् = परा पूः "ऋक्पूरब्धूःपथामानक्षे" (५.४.७४) इत्यकारः समासान्तः, पूर्वपदस्य च पुंवद्भावः परपुरम्, तत्। जगति= गच्छतीति "द्युतिगमिजुहोतीनां द्वे च" (३.२.१७८ सूत्रस्थेन) वार्तिकेन क्विपि द्वित्वे च विहिते "गमः क्वौ" (६.४.४०) इति मकारे लुप्ते तुक् जगत्, तस्मिन् जगति ॥४३॥

भाषा—विष देनेवाले अपने पाचक जगन्नाथ से महर्षि ने कहा—"यदि तुझे कोई जान लेगा कि विष पिलानेवाला यही है, तो लोग तुझे मरवा देंगे; अतः तू यहां से कहीं चला जा" यह कह कर उन्होंने मारने वाले उस परिचित रसोइये को अपने समीप से पर्याप्त धन देकर देशान्तर में भेज दिया। इसलिए हे दयावतार! आप जगत् में क्षमा के अनूठे उदाहरण हैं ॥४३॥

आभासः—अतिकष्टसहिष्णुत्वेनेदानीं श्रीदयानन्दमुपस्थापयति—

> कियत्कष्टं सोढं मुनिवर! सुधर्मोन्नतिकृते,
> कियद्वारं धूर्त्तैर्गरलमपि सम्भोजित इह।
> विसोढा वाग्बाणाः प्रहरणमपि प्रापि दृषदाम्,
> महात्मा धर्मार्थं गणयति न दुःखं न च सुखम् ॥४४॥

व्याख्या—मुनिवर! = यतिवर्य!, सुधर्मोन्नतिकृते=भारतीयोन्नयनहेतवे, वेदभाष्यव्याख्यानादिकरणायेत्यर्थः। कियत्=किम्परिमाणकम्, कष्टम्=अर्तिम्, सोढम्=तितिक्षितम्, इह=अस्मिन् कर्मणि, धूर्त्तैः प्रतारकैः, कियद्वारम्=कतिकृत्वः, गरलम्=हलाहलम्, अपि = गर्हार्थे प्रयुक्तः, (त्वम्) सम्भोजितः = खादितः, (त्वया) वाग्बाणाः=वाक्यसायकाः, विसोढाः=विषहिताः, दृषदाम् =पाषाणखण्डानाम्, प्रहरणम्=आक्रमणम्, अपि=वाक्यालङ्कारे, प्रापि=अलाभि, महात्मा = बृहद्बुद्धिः, धर्मार्थम्=मुक्तताय, न=नो, दुःखम्=पीडनम्, न = नहि, च पादपूर्तौ, सुखम्=आनन्दम्, गणयति=सङ्ख्यानयति ॥४४॥

व्युत्पत्तिः—सुधर्मोन्नतिकृते = शोभनो वैदिको धर्मो येषां ते

"धर्मादनिच् केवलात्" (५.४.२४) इत्यनिच् प्रत्ययः, सुधर्माणः भारतीयाः, तेषामुन्नतिः=सुधर्मोन्नतिः, तां करोतीति सुधर्मोन्नतिकृत्, तस्मै सुधर्मोन्नतिकृते । कियत्="किमिदंभ्यां वो घः" (५.२.४०) इति वतुपि किमः क्यादेशे वस्य घः कियत् । विसोढाः= "तीषसहलुभरुषरिषः" (७.२.४८) इति विकल्पेनेट् "परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम्" (८.३.७०) इति षत्वेन भाव्यम्, ढत्वधत्वलोपेषु च विहितेषु "सहिवहोरोदवर्णस्य" (६.३.११२) इत्योकारः । प्रापि=प्रपूर्वात् लुङि चिणि रूपम् । महात्मा= महान् आत्मा यस्य स महात्मा "आन्महतः समानाधिकरणजातीययोः" (६.३.४६) इति समानाधिरण उत्तरपदे महतस्तकारस्यात्त्वम्, "आत्मा कलेवरे यत्ने स्वभावे परमात्मनि । चित्ते धृतौ च बुद्धौ च परव्यावर्तनेऽपि च ।। इति धरणिः । धर्मार्थम्=धर्माय इति धर्मार्थम् ।।४४।।

भाषा—यतिराज ! भारतीयों की उन्नति हेतु आपने कितने कष्ट सहे । इस जगत् में कितने वार प्रवञ्चकों ने महाविष खिलाया । न जाने कितने वार निन्दनीय वचन आपने सुने । पत्थरों के प्रहार भी सहे । कहना ही पड़ता है कि महती बुद्धि रखनेवाले पुरुष धर्म कार्य हेतु सुख-दुःख नहीं गिनते उन्हें सहते चले जाते हैं ।।४४।।

आभासः—अथायं कविर्निजदेशवेषभाषाधर्मनीतिरीतिदीक्षाशिक्षाणामुपदेष्टुर्दयानन्दस्य गरिमाणमुपढौकते—

स्वमुन्नेतुं देशं निजविषयवेषं निजगिरम्,
स्वधर्मं स्वां नीतिं श्रुतिविहितरीतिश्च सुखदाम् ।
उपादिक्षद् दीक्षां निगममतशिक्षां य इह सः
स्वदेशस्योत्तंसो जयतु मुनिहंसोऽभ्युदयकृत् ।।४५।।

व्याख्या—यः = दयानन्दः, इह = अस्मिन्संसारे, स्वम् = निजम्, देशम् = भारतवर्षम्, उन्नेतुम् = उच्चैस्त्वं प्रापयितुम्, निजविषयवेषम् = आत्मीयदेशपरिधानम्, निजगिरम् = स्वीयभाषाम्, स्वधर्मम् = स्वकीयकर्त्तव्यम्, स्वाम् = आत्मनीनाम्, नीतिम् = राज्यसञ्चालनरीतिम्, सुखदाम् = प्रसादकारिणीम्, श्रुतिविहित रीतिम् = वेदप्रतिपादितमर्यादाम्, च = सर्वेषामेव पदानां प्राधान्येन समुच्चीयमानत्वात् चकारः समुच्चयेऽर्थे। दीक्षाम् = गुरुमुखात् सयज्ञं यथाविधि स्वेष्टदेवसिद्ध्यर्थं प्रथममुपदेशम्, उपादिक्षत् = अन्वशिषत्, सः = असौ, अभ्युदयकृत् = समृद्धिकारो, स्वदेशस्य = निजराष्ट्रस्य, उत्तंसः = भूषणम्, मुनिहंसः = मुनिभानुः, जयतु = जयमेतु ॥४५॥

व्युत्पत्तिः—निजविषयवेषम् = निजो विषयः निजविषयः, तस्मिन् यो वेषः निजविषयवेषः, तं निजविषयवेषम्। निजगिरम् = निजा च सा गीः निजगीः, तां निजगिरम्। स्वधर्मम् = स्वो धर्मः स्वधर्मः, तं स्वधर्मम्। सुखदाम् = सुखं ददातीति "आतोऽनुपसर्गे कः" (३.२.३) सुखदः, ततः स्त्रियां टाप् सुखदा, तां सुखदाम्। श्रुतिविहितरीतिम् = श्रुतिषु विहिता श्रुतिविहिता, श्रुतिविहिता रीतिः श्रुतिविहितरीतिः "पुंवत्कर्मधारयजातीयदेशीयेषु" इति पुंवद्भावः, तां श्रुतिविहितरीतिम्, दीक्षाम् = दीक्षधातोर्भावे अः प्रत्ययः, स्त्रियां टाप् दीक्षा, तां दीक्षाम्; उक्तं च शास्त्रपारगैः—"दीयते ज्ञानमत्यन्तं क्षीयते पापसञ्चयः। तस्माद् दीक्षेति सा प्रोक्ता मुनिभिस्तत्त्वदर्शिभिः।" उपादिक्षत् = उपपूर्वाद् दिशतेर्लुङ् "शल इगुपधादनिटः क्सः" (३.१.४५) इति च्लेः क्स आदेशः। मुनिहंसः = हन्ति दोषान् इति हंसः "भानुर्हंसः सहस्रांशुः तपनः सविता रविः" मुनिर्हंस इव मुनिहंसः "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" (२.१.५६) इत्युपमितसमासः ॥४५॥

भाषा—जिस ने इस विश्व में अपने भारतवर्ष को ऊँचा उठाने के लिये अपने देश के पहनावे, भाषा, कर्त्तव्य, राज्यशासन, वेदों में बताई मर्यादा, गुरुमुख से अपने इष्ट देव की सिद्धि के लिए यज्ञ विधिपूर्वक प्रथम उपदेश का अनुशासन किया, समृद्धि करनेवाला वह दयानन्द अपने राष्ट्र का भूषण है। सूर्य के समान दोषों को नष्ट करनेवाला मुनि है। वह उत्कर्ष को प्राप्त करे ॥४५॥

आभासः—अथ गुण्यग्रगण्यं ब्रह्मवंशावतंसं पाखण्डखण्डकं सत्यपथोपदेशेन विजेतारं दयानन्दं सर्वभूतवन्दनीयत्वेन स्मरति—

आदित्यब्रह्मचारी गुणिगणगणनास्वग्रगण्यो वरेण्यः,
वाग्ग्मी वश्येन्द्रियाणामवनिसुरकुलोत्तंस आर्यावतंसः।
नानापाखण्डिजालं जगति कुपथगं धर्मविद्यो न्यषेधत्,
सन्मार्गस्योपदेष्टा जयति स जगदानन्दनो वन्दनीयः ॥४६॥

व्याख्या—आदित्यब्रह्मचारी = आजीवनमविप्लुतब्रह्मचर्यः, गुणिगणगणनासु = गुणसम्पन्नवर्गसङ्ख्यानेषु, अग्रगण्यः = प्रथमसङ्ख्येयः सर्वोत्तमे महर्षिगणे भवो वा अनुत्तमं गणं लब्धा वा, वाग्ग्मी = वाग्विदग्धः, वश्येन्द्रियाणाम् = विनेयहृषीकाणाम्, वरेण्यः = प्रधानः, अवनिसुरकुलोत्तंसः = विप्राभिजनशिर आभरणम्, आर्यावतंसः = सत्पुरुषविभूषणम्, यः = महाविपश्चित्, धर्मवित् = कर्त्तव्यज्ञाता, जगति = संसारे, कुपथगम् = निषिद्धाचरणसेविनम्, नानापाखण्डिजालम = विभिन्नदाम्भिकनिकरम्, न्यषेधत् = अपावृणोत्, सः = असौ, सन्मार्गस्य = तथ्याचरणस्य, उपदेष्टा = व्याख्याता, जगदानन्दनः = विश्वहर्षकः, वन्दनीयः = प्रतीक्ष्यः, दयानन्दः

= एतन्नामकः, जयति = अधिपतित्वं याति। स्रग्धरा छन्दः— स्रग्धरा म्रौ भ्नौ यौ य् त्रिःसप्तकाः (पिङ्गले ७.२५) इति लक्षणात् ॥४६॥

व्युत्पत्तिः—गुणिगणगणनासु = गुणा एषु सन्तीति गुणिनः, मत्वर्थे इनिः, गुणिनां गणः गुणिगणः, तत्र गणनाः गुणिगणगणनाः, तासु गुणिगणगणनासु। अग्रगण्यः = गण्यते इति कर्मणि यत् गण्यः अथवा गणे भवः "दिगादिभ्यो यत्" (४.३.५४) गण्यः अथवा गणं लब्धा "धनगणं लब्धा" (४.४.८४) गण्यः, अग्रे गण्यः अग्रगण्यः। वाग्मी = प्रशस्ता वागस्त्यस्येति "वाचो ग्मिनिः" (५.२.१२४) इति ग्मिनिः वाग्मी। वश्येन्द्रियाणाम् = वशं गतानि "वशं गतः" (४.४.८६) इति यत् वश्यानि, वश्यानि इन्द्रियाणि येषां ते वश्येन्द्रियाः, तेषां वश्येन्द्रियाणाम्। वरेण्यः = व्रियते लोकैः "वृञः एण्यः" (३.९८ उणादिः) इति वरेण्यः। अवनिसुरकुलोत्तंसः = "ब्राह्मणोऽवनिसुरो विप्रः" "भवेदभिजनः ख्यातौ जन्मभूम्यां कुलध्वजे" इति मेदिनी, अवनिसुराणा कुलानि अवनिसुरकुलानि, तेषामुत्तंस इव अवनिसुरकुलोत्तंसः। आर्यावतंसः = आर्याणामवतंस इव "पुंस्युत्तंसावतंसौ द्वौ कर्णपूरे च शेखरे" आर्यावतंसः। कुपथगम् = कुत्सितः पन्थाः "कुगतिप्रादयः" (२.२.१८) समासे विहिते "ऋक्पूरब्धूःपथामानक्षे" (५.४.७४) इत्यः समासान्त. कुपथः, तं गच्छतीति "अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः" (३.२.४८) इति डः कुपथगः, तं कुपथगम्। निषिद्धाचरणसेविनमिति भावः ॥ वन्दनीयः = "प्रतीक्ष्यः प्रतिपाल्ये स्यात पूज्ये च" इति हैमः ॥४६॥

भाषा—महर्षि दयानन्द का ब्रह्मचर्य आजीवन खण्डित नहीं हुवा, इसलिये गुणसम्पन्न वर्ग की गिनतियों में सब से पहले सङ्ख्या में आते हैं, वे सर्वोत्तम महर्षिगण में होने वाले और अग्रिम गण को प्राप्त करने वाले

हैं। प्रशस्त वक्ता और इन्द्रियों को स्वाधीन करनेवालों में प्रमुख हैं। ब्राह्मण कुल के शिरोभूषण-तुल्य एवं आर्यों में शिरोमणि हैं। कर्त्तव्य के जानकार होते हुवे जिन्होंने निषिद्धाचरण सेवियों तथा अनेक दम्भियों का निवारण किया, वे तथ्य कर्त्तव्य की व्याख्या करनेवाले, जगत् के प्रमोद-कारी पूजनीय दयानन्द सबके ऊपर छा रहे हैं ॥४६॥

आभासः—परमात्मानं ध्यायतः प्रभातसूर्यस्येव शरीरलावण्य-वतो दयानन्दस्याकर्षणत्वं निर्दिशति—

ब्रह्मानन्दप्रबोधोदयदरुणरविप्रोल्लसन्मण्डलश्री-
संराजन्मुग्धवक्त्राम्बुजमुदयसरोबद्धपद्मासनस्य ।
योगीन्द्रस्य प्रभाते नियमितमनसो ध्यायतो ब्रह्म सत्यम्,
ब्रह्मज्ञानामृतं तद् रसयतु शिवदं भक्तभृङ्गान् प्रसक्तान् ॥४७॥

व्याख्या—प्रभाते = कल्ये, उदयसरोबद्धपद्मासनस्य = (उदयपुरे)_उदयनामककृत्रिमसागरसंलग्नपद्मासनस्य, नियमित-मनसः = संयतचित्तस्य, सत्यम् = अवितथम्, ब्रह्म = ओ३म्, ध्यायतः = मनोविषयमापादयतः, योगीन्द्रस्य = महायोगिनः, ब्रह्मानन्दप्रबोधोदयदरुणरविप्रोल्लसन्मण्डलश्रीसंराजन्मुग्धवक्त्राम्बु-जम् = ओ३मानन्दानुभूत्युदगच्छद्रक्ततपनद्योतमानपरिधिछविदेदी-प्यमानमनोरममुखकमलम्, प्रसक्तान् = अनुरक्तान्, भक्तभृङ्गान् = सेवकद्विरेफान्, तत् शिवदम् = हितकरम्, ब्रह्मज्ञानामृतम् = ओ३मावगतिहृद्यम्, रसयतु = आस्वादयतु स्रग्धरावृत्तं विहितपूर्व-लक्षणम् ॥४७॥

व्युत्पत्तिः—प्रभाते – "कल्यं प्रभाते मधुनि सज्ये दक्षे निरामये"

इति हैमः। उदयसरोबद्धपद्मासनस्य = (उदयपुरे) उदयसरसि बद्धं पद्मासनं येन स तथोक्तः, तस्य उदयसरोबद्धपद्मासनस्य। नियमितमनसः = नियमितं मनो यस्य स नियमितमनाः, तस्य नियमितमनसः। ब्रह्मानन्दप्रबोधोदयदरुणरविप्रोल्लसन्मण्डलश्रीसंराजन्मुग्धवक्त्राम्बुजम् = ब्रह्मण आनन्दः ब्रह्मानन्दः, तस्य प्रबोधः ब्रह्मानन्दप्रबोधः, तस्माद् उदयन् ब्रह्मानन्दप्रबोधोदयन्, स चासौ अरुणरविः ब्रह्मानन्दप्रबोधोदयदरुणरविः, तस्य प्रोल्लसती मण्डलश्रीः ब्रह्मानन्दप्रबोधोदयदरुणरविप्रोल्लसन्मण्डलश्रीः; अम्बुनि जायत इति अम्बुजम्, वक्त्रमम्बुजमिव वक्त्राम्बुजम्, मुग्धं वक्त्राम्बुजं मुग्धवक्त्राम्बुजम्, ब्रह्मानन्दप्रबोधोदयदरुणरविप्रोल्लसन्मण्डलश्रिया संराजन्मुग्धवक्त्राम्बुजं ब्रह्मानन्दप्रबोधोदयदरुणरविप्रोल्लसन्मण्डलश्रीसंराजन्मुग्धवक्त्राम्बुजम् तत् (कर्तृपदम्) भक्तभृङ्गान् = "द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरालयः" भक्ता एव भृङ्गाः भक्तभृङ्गाः, तान् भक्तभृङ्गान्। शिवदम् = शिवं ददातीति शिवदः, तत् शिवदम्। ब्रह्मज्ञानामृतम् = ब्रह्मणो ज्ञानं ब्रह्मज्ञानम्, तदेवामृतं ब्रह्मज्ञानामृतम्, तत् ॥४७॥

भाषा—सूर्योदय से पूर्व ब्राह्म समय में उदयपुर के उदयसागर पर कमलासन लगाकर, चित्त को स्वाधीन कर, सद्ब्रह्म का ध्यान करते हुवे महायोगी दयानन्द विराजमान थे। ओ३म् की आनन्दानुभूति से आविर्भूत, लोहित सूर्य सम्बन्धी दीप्त परिधि की छवि—जैसा चमकता उनका सुन्दर मुखकमल था। वह भक्त-भौंरों को आकर्षित करता हुवा उन्हें उस हितकर प्रिय ओ३म् ज्ञान का आस्वादन करावे ॥४७॥

आभासः—इदानीं त्रयतापपीडितजनान् दयानन्दकीर्तिसुधाकर आनन्दत्वित्युपक्रमते—

भवातपनिपीडितान्तरविलोचनानन्दनो,
लसद्गुणकलः सुकर्मकुमुदावलीमोदनः ।
सदाऽखिलजनान् सुवेदवचनामृतं पाययन्,
मुदं वितनुतान्मुनीन्द्र ! तव सद्यशश्चन्द्रमाः ॥४८॥

व्याख्या—हे मुनीन्द्र ! = तपस्विन् !, भवातपनिपीडितान्तरविलोचनानन्दनः = जगदुष्णताक्लेशिताभ्यन्तरनेत्रप्रसादकः, लसद्गुणकलः = चकासत्प्रसादभागः, सुकर्मकुमुदावलीमोदनः = सद्धर्मसितकमलततिविकस्वरः, तव = त्वदीयः, सद्यशश्चन्द्रमाः = स्वच्छख्यातिसुधाकरः, सदा = सर्वदा, अखिलजनान् = सकलमानवान्, सुवेदवचनामृतम् = सन्निगमवाक्यपीयूषम्, पाययन् = धापयन्, मुदम् = प्रसन्नताम्, वितनुतात् = विस्तृणुतात् । पृथ्वीवृत्तम् "पृथ्वी ज्सौ ज्सौ य्लौ ग् वसुनवकौ" (पिंगले ७.१७) इतिच्छन्दोलक्षणात् ॥४८॥

व्युत्पत्तिः—भवातपनिपीडितान्तरविलोचनानन्दनः = आनन्दयतीति आनन्दनः, भवस्य आतपः भवातपः, तेन निपीडितानि आन्तराणि विलोचनानि च येषां ते भवातपनिपीडितान्तरविलोचनाः, तेषाम् आनन्दनः भवातपनिपीडितान्तरविलोचनानन्दनः । लसद्गुणकलः = गुणानां कलाः गुणकलाः, लसन्तो गुणकलाः यस्य स लसद्गुणकलः । सुकर्मकुमुदावलीमोदनः = शोभनानि कर्माणि सुकर्माणि, तान्येव कुमुदानि सुकर्मकुमुदानि, "सिते कुमुदकैरवे" तेषाम् आवली सुकर्मकुमुदावली, तस्या मोदनः सुकर्मकुमुदावलीमोदनः । सद्यशश्चन्द्रमाः = सच्च तद्यशः सद्यशः, तदेव चन्द्रमाः सद्यशश्चन्द्रमाः । अखिलजनान् = अखिलाश्च ते जनाः अखिलजनाः, तान् अखिलजनान् । सुवेदवचनामृतम् = शोभनाश्च ते वेदाः सुवेदाः,

तेषां वचनानि सुवेदवचनानि, तान्येव अमृतं सुवेदवचनामृतम्, तत्। पाययन् = पाययतीति पाययन् शत्रन्तं रूपम्। मुदम् = मुदेर्भावे क्विप् मुत् तां मुदम् ॥४८॥

भाषा—हे तपस्विन्! जगत् की उष्णता से क्लेश पाये हुवे मनुष्यों के अन्तःकरण और नेत्रों को प्रसन्न करनेवाला, प्रसन्नता गुणों के भागों का विकासकारी, सुधर्मरूप श्वेतकमल--पङ्क्ति को खिलानेवाला आपका स्वच्छख्यातिरूप चन्द्रमा सब कालों में प्रतिमानव को अनुत्तम वेदों का वाक्यरूप अमृत पिलाता हुवा प्रसन्नता का विस्तार करे ॥४८॥

आभासः—अथ त्रयतापहरस्य श्रौतकर्मकल्पद्रुमस्य सेक्तारं दयानन्दमाह—

यः प्रेयस्सुखरम्यपुष्पसुरभिं दत्ते श्रितो भोगिने,
श्रेयस्सौख्यफलं प्रयच्छति पुनः शान्तात्मने योगिने।
सोऽयं वैदिकधर्मकल्पविटपी स्वच्छायया देहिनाम्,
सन्तापं हरतान्मुनीन्द्र! भवता यत्नाम्बुभिर्जीवितः ॥४९॥

व्याख्या—श्रितः=भक्ताधारः (सन्) यः=दयानन्दः, भोगिने =विलासिने, प्रेयस्सुखरम्यपुष्पसुरभिम् = लौकिकाभ्युदयसुखमनोज्ञप्रसूनसौरभम्, दत्ते = प्रयच्छति। पुनः = तदनु, शान्तात्मने= शमितचित्ताय, योगिने = प्रशस्तयोगयुक्ताय, श्रेयःसौख्यफलम् = कैवल्यानन्दोदयम्, प्रयच्छति = ददाति, सः=असौ, अयम्=एषः, मुनीन्द्र! = महामुने!, भवता = योगगुणैर्दीप्यमानेन श्रीमता, यत्नाम्बुभिः=प्रयासपानीयैः, जीवितः=प्राणान् प्रापितः, वैदिकधर्म-कल्पविटपी = श्रौतकर्मकल्पवृक्षः, स्वच्छायया = स्वकीयकान्त्या,

देहिनाम् = वपुष्मताम्, सन्तापम् = क्लेशम्, हरतात् = अपनयतात् शार्दूलविक्रीडितं छन्दः "शार्दूलविक्रीडितं म्सौ ज्सौ तौ गादित्य ऋषयः" (पिंगलशास्त्रे ७.२२) इति लक्षणात् ॥४८॥

व्युत्पत्तिः—भोगिने = भोगोऽस्यास्तीति "भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने। संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः ॥" इति निन्दायामिनिः प्रत्ययः भोगी, तस्मै भोगिने जातावेकवचनम् भोगिभ्य इत्यर्थः। प्रेयस्सुखरम्यपुष्पसुरभिम् = प्रेयसः सुखं प्रेयस्सुखम्, रम्यं पुष्पं रम्यपुष्पम्, "स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम्" प्रेयस्सुखमेव रम्यपुष्पं प्रेयस्सुखरम्यपुष्पम्, तस्य सुरभिः प्रेयस्सुखरम्यपुष्पसुरभिः, तां प्रेयस्सुखरम्यपुष्पसुरभिम्। शान्तात्मने = "वा दान्तशान्तेति" (७.२.२७) निपातितः, शान्त आत्मा यस्य स शान्तात्मा, तस्मै शान्तात्मने। योगिने = योगोऽस्यास्तीति संसर्गे इनिः योगी, तस्मै योगिने, जातावेकवचनं योगिभ्य इत्यर्थः। श्रेयस्सौख्यफलम् = सुखमेव सौख्यम्, स्वार्थे ष्यञ्, श्रेयसः सौख्यं श्रेयस्सौख्यम्, तस्य फलं श्रेयस्सौख्यफलम्। मुनीन्द्रः = मुनीनामिन्द्रः मुनीन्द्रः, तदाकारणे मुनीन्द्र! यत्नाम्बुभिः = यत्नाः एव अम्बूनि यत्नाम्बूनि, तैः यत्नाम्बुभिः। वैदिकधर्मकल्पविटपी = वेदेषु भवः "तत्र भवः" (४.३.५३) इति ठञ् वैदिकः, स चासौ धर्मः वैदिकधर्मः; कल्पः—कल्पते स्वक्रियायै समर्थो भवत्यत्रेति कृप्धातोरधिकरणे घञ् "कृपो रो लः" (८.२.१८) इति रेफे ऋ श्रुतिसामान्याल्लत्वम् कल्पः, कल्पः विटपो कल्पविटपी "वृक्षो महीरुहः शाखी विटपी पादपस्तरुः" वैदिकधर्म एव कल्पविटपी वैदिकधर्मकल्पविटपी। स्वच्छायया = स्वस्य छाया "छे च" (६.१.१७३) इति तुगागमे "स्तोश्चुना श्चुः" (८.४.४०) इति श्चुत्वे स्वच्छाया, तया स्वच्छायया। "छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः"। देहिनाम् = देहा

एषां सन्तीति "अत इनिठनौ" (५.२.११५) इति नित्ययोगे इनिः देहिनः, तेषां देहिनाम्। हरतात्=लोट्याशिषि "तुह्योस्तातङ्ङा-शिष्यन्यतरस्याम्" (७.१.३५) इति तातङादेशः ।।४९।।

भाषा—भक्तों के अवलम्बन श्री दयानन्दसरस्वती विलासियों के लिए लौकिक अभ्युदयरूप उत्तम फलों का सुगन्ध देते हैं। पश्चात् प्रशान्त-चित्तवाले उन योगावलम्बियों को पुनर्जन्म न लेने के आनन्द का फल प्रदान करते हैं, आप ऐसे हैं महामुने ! आपने प्रयास रूप पानी से वैदिक कर्म रूप कल्पवृक्ष जीवित किया है, वह अपनी कान्ति से देहधारी साधारण मनुष्यों के क्लेश दूर करे ।।४९।।

आभासः—अथ स्वग्रन्थसमापनमुपक्रममाणोऽनेन दयानन्दलहरीमाध्यमेन नूनानन्दयितुमुत्सहते—

ममास्यै कान्तायै मधुरकवितायै रसभरी—
प्रदात्री तस्या वा नवनवगुणोन्मीलनकरी ।
दयानन्दस्येयं सुकृतसरसो वायुलहरी
सदृश्यानन्दं सा वितरतु दयानन्दलहरी ॥५०॥

व्याख्या—मम = कवेः, अस्यै = विद्यमानायै, कान्तायै = दयितायै, मधुरकवितायै = माधुर्यगुणपूर्णकविरचनायै, रसभरी-प्रदात्री = आनन्दरसप्रपातसञ्चारिका, तस्याः = अमुष्याः, वा= समुच्चयेऽर्थे, नवनवगुणोन्मीलनकरी = नूतननूतनगुणविकस्वरा, दयानन्दस्य= दयानन्दस्वामिनः, सुकृतसरसः = पुण्यपद्माकरस्य, सा=दृष्टिगोचरा, इयम्=एषा, वायुलहरी सदृशी = वातातिवीची तुल्या, दयानन्दलहरी = करुणाहर्षतरङ्गा दयानन्दलहरीनामिका

पुस्तिका, आनन्दम् =अलौकिकसुखम्, वितरतु=प्रयच्छतु । शिखरिणीवृत्तम् "शिखरिणी य्मौ न्सौ भ्लौ गृतुरुद्राः" (७.२०) इति पिङ्गलच्छन्दोलक्षणात् ।।५०।।

व्युत्पत्तिः—मधुरकवितायै = कवेर्भावः कविता, मधुरेण पूर्ण कविता मधुरकविता, मध्यमपदलोपिसमासः, तस्यै मधुरकवितायै। रसझरीप्रदात्री = प्रकर्षेण ददातीति तृन्नन्तान्ङीप् प्रदात्री, झरी-झृष् धातोः झीर्यति जीर्णीभवति दुःखावस्थानया सा झरी, षित्त्वान्ङीष्, रसस्य झरी रसझरी, रसझरीं प्रदात्री रसझरीप्रदात्री। नवनवगुणोन्मीलनकरी = उन्मीलनं करोतीति स्त्रियाम् उन्मीलनकरी, नवाः नवाः नवनवाः वीप्सायां द्विर्वचनम्, सुप्सुपेति समासः, नवनवाः गुणाः नवनवगुणाः. नवनवगुणानामुन्मीलनकरी नवनवगुणोन्मीलनकरी । सुकृतसरसः = शोभनानि कृतानि सुकृतानि, सुकृतान्येव सरः सुकृतसरः, तस्य सुकृतसरसः । "पद्माकरस्तडागोऽस्त्री कासारः सरसी सरः"। वायुलहरीसदृशी = वायोर्लहरी वायुलहरी, "भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचिरथोर्मिषु"। तया सदृशी वायुलहरीसदृशी दयानन्दलहरी = दया च आनन्दश्च दयानन्दौ तयोर्लहर्यो यस्यां सा दयानन्दलहरी, "न संज्ञायाम्" (५.४.१५५) इति कबभावः ।।५०।।

भाषा—मुझ कवि की इस प्रिय और मधुर गुण से पूर्ण कविता के लिये आनन्द रसों का सञ्चार करने वाली और उसके नये नये गुणों का विकास करनेवाली महर्षिदयानन्द के पुण्यकर्म रूप तालाब की प्रत्यक्ष वायु-लहर के समान करुणा और हर्ष के तरङ्गों वाली यह "दयानन्द-लहरी" नाम की पुस्तिका अलौकिक सुखदायिनी हो ।।५०।।

आभासः—अथानेकगुणोल्लसितदयानन्दस्य वाणीगङ्गा पवित्रयत्वित्यात्मने आशास्ते ।

आनन्दिताशेषबुधान्तरङ्गा,
सद्यः कृताऽनाथजनार्त्तिभङ्गा ।
दयोत्तरङ्गा मुनिसूक्तिगङ्गा,
ममान्तरङ्गाण्यमलीकरोतु ॥५१॥

व्याख्या—मुनिसूक्तिगङ्गां विशेषयितुमुपक्रमते — आनन्दिताशेषबुधान्तरङ्गा = हर्षितनिखिलविपश्चिच्चित्ता, सद्यः = तत्क्षणे, कृतानाथजनार्त्तिभङ्गा = विहितासहायमनुजदुःखध्वंसिका, दयोत्तरङ्गा = अनुकम्पोर्मिका, मुनिसूक्तिगङ्गा = ऋषिदयानन्दसुवचोभागीरथी, मम = कवेः, अन्तरङ्गाणि = मनोबुद्धिचित्ताहङ्कारचतुष्टयान्तःसाधनानि, अमलीकरोतु = निर्मलीकरोतु ॥५१॥

उपजातिवृत्तम् = तल्लक्षणन्तु पिंगलशास्त्रे "इन्द्रवज्रा तौ ज्गौ ग्" "उपेन्द्रवज्रा ज्तौ ज्गौ ग्" "आद्यन्ता उपजातयः" (६.१५-१७) ॥

व्युत्पत्तिः आनन्दिताशेषबुधान्तरङ्गाः—अशेषाः बुधाः अशेषबुधाः, तेषाम् अन्तरङ्गाणि, अशेषबुधान्तरङ्गाणि, आनन्दितानि अशेषबुधान्तरङ्गाणि यया सा आनन्दिताशेषबुधान्तरङ्गा, सद्यः = "सद्यः परुत्परार्य्यैषमः०" इति (५.३.२२) इति द्यः प्रत्ययः, समानस्य सभावश्च निपात्यते, समानेऽहनि सद्यः । कृतानाथजनार्त्तिभङ्गा = अनाथाश्च जनाश्च अनाथजनाः, तेषाम् अर्त्तिः, अनाथजनार्त्तिः, तस्याः भङ्गः अनाथजनार्त्तिभङ्गः, कृतः अनाथजनार्त्तिभङ्गः यया सा कृतानाथजनार्त्तिभङ्गा । दयोत्तरङ्गा = उत्कृष्टाः तरङ्गाः उत्तरङ्गाः, दयायाः उत्तरङ्गा यस्यां सा दयोत्तरङ्गा । मुनिसूक्तिगङ्गा = शोभना उक्तयः सूक्तयः, मुनीनां सूक्तयः मुनिसूक्तयः, ताः एव गङ्गा मुनिसूक्तिगङ्गा । अन्तरङ्गाणि = अन्तः—मध्येशरीरम् अङ्गानि अन्तरङ्-

गाणि "कुमति च" (८.४.१३) इति णत्वम् । अमलीकरोतु = अनमलम् अमलं संपद्यमानं करोतीति "अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्त्तरि च्विः" (५.४.५०) इति च्विः प्रत्ययः अस्य च्वौ (७.४.३२) इतीत्वम् अमलीकरोति, लोट्लकारे अमलीकरोतु ।।५१।।

भाषा—जिसने सकलविद्वज्जनों के चित्तों को हर्षयुक्त किया है, असहायों और अज्ञ जनों के दुःख का जिसके द्वारा तुरन्त हनन हुवा है, एवं जिसमें अनुकम्पा के बड़े बड़े तरङ्ग उठ रहे हैं, वह महर्षि दयानन्द की वेदविभूषिता वाणीरूपी गङ्गा मुझ कवि के मन, बुद्धि, चित्त, अहङ्कार को निर्मल बनावे ।।५१।।

आभासः—पापान्धकारनाशको दयानन्दभास्करो जनहृदयानि प्रकाशतामिति पुस्तकावसितौ स्वभावनां प्रसारयति कविः—

आदित्यब्रह्मचर्याभिधविमलमहःपुञ्जतो ध्वान्तवृन्दम्,
भिन्दानो वाममार्गाचरणनिशिचरानन्दरात्री निहन्ता ।
पुण्यात्माम्भोजकान्तो निगममतवनोद्भासने चेतनांशुः,
संसारोद्बोधनोऽयं विलसतु हृदये श्रीदयानन्दभानुः।।५२।।

इति श्रीमता दाक्षिणात्येन श्रीमदार्यवर्यजगज्जीवन-
सूनुना श्रीलसरस्वतीनन्दनेन पण्डितमेधाव्रत-
महाकविना प्रणीता "दयानन्दलहरी"
समाप्तिमगात् ।

व्याख्या—आदित्यब्रह्मचर्याभिधविमलमहःपुञ्जतः=अष्टचत्वारिंशद्वर्षपर्यन्तादित्यब्रह्मचर्यनामधेयनिर्मलवर्चोराशितः, ध्वान्तवृन्दम् = तिमिरनिकरम्, भिन्दानः = घ्नन्, वाममार्गाचरणनिशि-

चरानन्दरात्रीनिहन्ता = प्रतीपपथगन्तृरक्षःसुखनिशीथिनीनिषूदनः, पुण्यात्माम्भोजकान्तः = धार्मिकजनारविन्दप्रेमा, निगममतवनोद्भासने = वेदसिद्धान्तविपिनप्रकाशने, चेतनांशुः = संज्ञानमयूखः, अयम् = एषः, संसारोद्बोधनः = लोकोत्तेजनः, श्रीदयानन्दभानुः = ब्रह्मानन्दार्कः श्रीदयानन्दार्को वा, हृदये = नराणामन्तःकरणे, विलसतु = दीप्यताम् ।।५२।।

स्रग्धरा छन्दः—छन्दोलक्षणन्तु "स्रग्धरा म्रौ भ्नौ यौ य् त्रिसप्तकाः" (७.२०) पिङ्गलशास्त्रे ।

व्युत्पत्तिः—आदित्यब्रह्मचर्याभिधविमलमहःपुञ्जतः = विमलानि च तानि महांसि विमलमहांसि "वर्चो दीप्तिर्महस्तेजः" तेषां पुञ्जः विमलमहःपुञ्जः, "स्यान्निकायः पुञ्जराशी", आदित्यम् अष्टचत्वारिंशद्-वर्षं यावद्ब्रह्मचर्यम् आदित्यब्रह्मचर्यम्, अभिधा = अभ्युपसृष्टाद् दधातेः करणे भावे च "आतश्चोपसर्गे" (३.३.१०६) इत्यङ्, स्त्रियां टाप् अभिधा "आख्याह्वे अभिधानं च नामधेयं च नाम च" आदित्य-ब्रह्मचर्यस्याभिधा, आदित्यब्रह्मचर्याभिधा, सैव विमलमहःपुञ्जः आदित्यब्रह्मचर्याभिधविमलमहःपुञ्जः "पुंवत्कर्मधारयजातीयदेशीयेषु" इति पुंवद्भावः, तस्मात् आदित्यब्रह्मचर्याभिधविमलमहःपुञ्जतः "तसिप्रकरणे आद्यादिभ्य उपसंख्यानम्" (५.४.४४) वार्त्तिकात् तसिः प्रत्ययः । ध्वान्तवृन्दम् = "अन्धकारः स्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः" तस्य वृन्दं ध्वान्तवृन्दम् । भिन्ते इति भिन्दानः लटः शानजादेशः । वाममार्गाचरणनिशिचरानन्दरात्रीनिहन्ता = वामो मार्गो वाममार्गः "वामौ वल्गुप्रतीपौ द्वौ" चरन्तीति "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" इति कर्त्तरि ल्युः, चरणाः, वाममार्गे चरणाः, वाममार्गचरणाः, चरन्तीति पचादित्वादच् चराः, निशि चराः निशिचराः, "तत्पुरुषे

कृति बहुलम्" (६।३।१४) इति सप्तम्या अलुक् "राक्षसः कौणपः क्रव्याद् रक्षो निशिचरोऽस्रपः" वाममार्गचरणाः एव निशिचराः वाममार्गचरणनिशिचराः, आनन्दाय-रात्री आनन्दरात्री, वाममार्गचरणनिशिचराणाम् आनन्दरात्री, वाममार्गचरणनिशिचरानन्दरात्री, तस्याः निहन्ता वाममार्गाचरणनिशिचरानन्दरात्रीनिहन्ता । पुण्यात्माम्भोजकान्तः =पुण्ये आत्मा येषां ते पुण्यात्मानः, ते एव अम्भोजानि पुण्यात्माम्भोजानि, तेषां कान्तः पुण्यात्माम्भोजकान्तः। निगममतवनोद्भासने =निगमानां मतानि निगममतानि, तान्येव वनानि, निगममतवनानि, तेषाम् उद्भासनम्, निगममतवनोद्भासनम्, तस्मिन् निगममतवनोद्भासने। चेतनांशुः = चेतनाः एव अंशवो यस्य स चेतनांशुः "किरणोस्रमयूखांशुगभस्तिघृणिपृश्नयः" । संसारोद्बोधनः = उत्कृष्टं बोधते इति उद्बोधनः "कर्त्तरि ल्युः", संसारस्य उद्बोधनः संसारोद्बोधनः। श्रीदयानन्दभानुः=श्रीः शोभा दयायां यस्य तत् श्रीदयं ब्रह्म, तस्य आनन्दः श्रीदयानन्दः, अथवा दयायामानन्दो यस्य स दयानन्दः, श्रिया—गुणशोभया युक्तो दयानन्दः श्रीदयानन्दः, मध्यमपदलोपिसमासः, श्रीदयानन्द एव भानुः श्रीदयानन्दभानुः ।।५२।।

भाषा—आजीवन ब्रह्मचर्यरूप निर्मल तेजों से अविद्यान्धकारों को हटाते हुए, उन्मार्गगामी राक्षसों को आनन्द देनेवाली रात्रि के विनाशक, धार्मिक जनों के प्रिय, वैदिक सिद्धान्तरूप जङ्गलों के प्रकाशन में ज्ञान किरणों वाले—ये संसार को उत्तेजना देनेवाले ब्रह्म और दयानन्द रूपी सूर्य नर नारियों के अन्तःकरण में प्रदीप्त हों ।।५२।।

इति स्वामिवेदानन्दवेदवागीशकृता आभास-
व्याख्याव्युत्पत्तिराष्ट्रभाषासमन्विता
दयानन्दलहर्यां ज्योतिष्मती टीका
समाप्ता ।

हमारे प्रमुख प्रकाशन

व्याकरणमहाभाष्यम् (प्रदीप उद्योत, विमर्शसहित)	१०००—००
अष्टाध्यायी	१५—००
कारिकाप्रकाश	१०—००
लिङ्गानुशासनवृत्ति	१०—००
फिटसूत्रप्रदीप	५—००
छन्दःशास्त्रम्	४५—००
काव्यालकारसूत्राणि	१६—००
निरुक्त (हिन्दीभाष्य)	२००—००
योगार्यभाष्य (आर्यमुनि)	२०—००
१०. सांख्यार्यभाष्य (आर्यमुनि)	४०—००
११. मीमांसार्यभाष्य (३ भाग)	२६०—००
१२. वैशेषिकार्यभाष्य	६०—००
१३. न्यायार्यभाष्य	१००—००
१४. वेदान्तार्यभाष्य	१२०—००
१५. भारतेतिहासः	१०—००
१६. अष्टाध्यायीप्रवचनम् (६ भाग)	६५०—००
१७. छान्दोग्योपनिषद्भाष्यम्	२००—००
१८. बृहदारण्यकोपनिषद्भाष्यम्	१२०—००
१९. उपनिषत्समुच्चय	१००—००
२०. इण्टरनेशनल फिलासफी ऑफ योगा	१००—००
२१. मनोविज्ञान तथा शिवसंकल्प	३०—००
२२. दयानन्दप्रकाश	५०—००
२३. धर्मनिर्णय (१—४ भाग)	८०—००
२४. वैदिकविनय (१—३ भाग)	६०—००
२५. देशभक्तों के बलिदान	१२५—००
२६. सत्यार्थप्रकाश	५०—००
२७. स्वतन्त्रता संग्राम में आर्यसमाज का योगदान	४०—००
२८. यजुर्वेद संहिता	६०—००
२९. सामवेद संहिता	४०—००
३०. अथर्ववेद संहिता	१५०—००
३१. ऋग्वेद संहिता	२५०—००
३२. सामवेद पदसंहिता	२५—००
३३. ओमानन्द अभिनन्दन ग्रन्थ	१००—००
३४. सुखी जीवन	१५—००
३५. महापुरुषों के संग में	१५—००
३६. घर का वैद्य (१—५ भाग)	५०—००
३७. दैनंदिनी	१५—००
३८. ब्रह्मचर्य क साधन (१—११ भाग)	६०—००
३९. संस्कृतप्रबोध	१०—००
४०. गीताविवेक	२०—००
४१. कुलियात आर्यमुसाफिर (दो भाग)	१२०—००
४२. दयानन्द लहरी	१५—००
४३. विरजानन्दचरितम्	१५—००
४४. रामायणार्यभाष्य (दो भाग)	३२०—००
४४. महाभारतार्यभाष्य (दो भाग)	४५०—००

हरयाणा साहित्य संस्थान

गुरुकुल झज्जर (हरयाणा)

लेखकस्यान्यपुस्तकानि

१.	दयानन्ददिग्विजयः १ भागः	१००-००
२.	,, ,, २ भागः	१००-००
३.	छन्दःशास्त्रं व्रतिमंगलासमेतम्	४५-००
४.	काव्यालंकारसूत्राणि	१६-००
५.	विरजानन्दचरितम्	१५-००
६.	नारायणस्वामिचरितम्	१५-००
७.	गुरुकुलशतकम्	
८.	ब्रह्मचर्यशतकम्	
९.	ब्रह्मचर्यमहत्त्वम्	
१०.	प्रकृतिसौन्दर्यम्	
११.	कुमुदिनीचन्द्रः	४०-००
१२.	दयानन्दलहरी	१५-००
१३.	दिव्यानन्दलहरी	
१४.	सुखानन्दलहरी	
१५.	गिरिराजगौरवम्	
१६.	ईशोपनिषत्काव्यम्	
१७.	साहित्यसुधा १ भाग	१०-००
१८.	,, ,, २ भाग	

प्राप्तिस्थानम्—

हरयाणा-साहित्य-संस्थान, गुरुकुल झज्जर